RATNAVALI,

A DRAMA

IN IV. ACTS,

BY

SRIHARSHA DEVA

AN ANCIENT RAJAH OF KASHMERE

EDITED

WITH A COMMENTARY

BY

PANDIT JIBANADA VIDYASAGARA B. A.

Superintendent, Free Sanskrit College.

CALCUTTA:

AT THE SARASWATI PRESS.

1876

To be had from Pandit Jibananda Vidyasagara B. A.
Surpintendent, Free Sanskrit College, Calcutta.

Digitized by Google

प्रेक्षित-कुलतिलक पूज्यपाद श्रीमत् तर्कवाचस्पति पाद-प्रणीत-प्रकाशित-पुस्तकान्येतानि ॥

१ आशुबोध व्याकरणम् १।०
२ धातुरूपादर्शः २
३ शब्दस्तोम महानिधिः (संस्कृत अभिधान) १०
४ सिद्धान्तकौमुदीसरलाटीकासहिता ११
५ सिद्धान्तविन्दुसार (वेदान्त) ॥०
६ तुलादानादि पद्धति (बङ्गाक्षरैः) ४
७ गयाश्राद्धादि पद्धति १
८ शब्दार्थ रत्न ।।।०
९ वाक्यमञ्जरी (बङ्गाक्षरैः) ।०
१० छन्दोमञ्जरी तथा वृत्तरत्नाकर सटीक ॥=
११ वेणीसंहार नाटक सटीक १
१२ मुद्राराक्षसनाटक सटीक १॥०
१३ रत्नावली सटीक ।।।०
१४ मालविकाग्निमित्र सटीक १॥०
१५ धनञ्जय विजय सटीक ।०
१६ महावीरचरित १॥०
१७ साङ्ख्यतत्त्व कौमुदी सटीक २
१८ वैयाकरणभूषणसार ।।।०
१९ लीलावती ।।।०
२० बीजगणित १
२१ शिशुपालवध सटीक (माघ) ४
२२ किरातार्जुनीय सटीक २॥०
२३ कुमारसम्भव पूर्वखण्ड सटीक ।।०
२३ कुमारसम्भव उत्तरखण्ड ॥०
२५ चाणक्यमुपाख्यानीयम् ।।।०
२६ वाचस्पत्यम् (संस्कृत बृहदभिधान) १००
२७ कादम्बरी सटीक ४
२८ राजप्रशस्ति =
२९ अनुमानचिन्तामणि तथा अनुमानदीधिति ४
३० सर्वदर्शनसंग्रह १
३१ भामिनी विलास सटीक १
३२ हितोपदेश सटीक १
३३ भाषापरिच्छेद मुक्तावलीसहित १
३४ बङ्गविक्षाहवाद ।०
३५ दशकुमारचरित सटीक १॥०
३६ परिभाषेन्दुशेखर ।।।०
३७ कविकल्पद्रुम (बोपदेवकृत) ॥०
३८ चक्रदत्त (वैद्यक) १॥०
३९ उणादिसूत्र सटीक २
४० मेदिनी कोष १
४१ पञ्चतन्त्रम् (श्रीविष्णुशर्म्मणा सङ्कलितम्) २॥
४२ विद्वन्मोदतरङ्गिणी (चम्पूकाव्य) ॥०
४३ माधवचम्पू ।=
४४ तर्कसंग्रह (इंराजी अनुवाद सहित) ॥
४५ प्रसन्नराघव नाटक (श्रीजयदेव कवि विरचित)
४६ विवेक चूड़ामणि (श्रीमत् शङ्कराचार्य विरचित) ।

Digitized by Google

3 N 96 E 93

रत्नावली

नाटिका

श्रीश्रीहर्षदेवविरचिता

बि, ए, उपाधि-धारिणा

श्रीजीवानन्द विद्यासागर-भट्टाचार्य्येण

विरचितटीकाद्वयसमेता

तेनैव संस्कृत्य प्रकाशिता च

कलिकातानगरे

सरस्वतीयन्त्रे मुद्रिता

इं १८७६

125491

22 JUN 1891 Stechert. 56 L 38

Digitized by Google

Digitized by Google

रत्नावली।

नाटिका।

प्रथमोऽङ्कः।

पादाग्रस्थितया मुहुः स्तनभरेणानीतया नम्रतां
शम्भोः सस्पृहलोचनत्रयपथं यान्त्या तदाराधने।
व्रीडत्या शिरसोद्वितः सपुलकस्वेदोद्गमोत्कम्पया
विश्लिष्यन् कुसुमाञ्जलिर्गिरिजया चित्रोऽन्तरे पातु वः॥ (क)

(क) इयं कविकुलवल्लभस्य श्रीहर्षदेवस्य कृतिरष्टाङ्कविधोपरूपकेष्वन्तर्गता नाटिकायाम्। अधुना रङ्गविघ्नोपशान्तये नान्दीकर्त्तव्यतां विधित्सुस्तावदादौ मङ्गलाचरणं प्रस्तौति पादाग्रेति। पादाग्रयोः स्थितया, पादाग्रभागमवलम्बमानया स्तनभरेण स्तनगुरुत्वेन मुहुर्नम्रतामानीतया प्रापितया, तदाराधने शिवसेवायां शम्भोः पत्युः सस्पृहाणां दृष्टयूणां लोचनत्रयाणां पन्थानमिति पथं गोचरं यान्त्या प्राप्नुवन्त्या, अत एव व्रीडत्या लज्जितया, तथा पुलकस्य स्वेदोद्गमस्य उत्कम्पस्य तैः सह वर्त्तमानया, एतान्यपि सात्त्विकलक्षणानि बोद्धव्यानि। गिरिजया पार्वत्या शिरसि पत्युरित्यर्थात्। ईक्षितः सम्यादितः दत्त इत्यर्थः विश्लिष्यन् दानानन्तरं मस्तकात् भ्रंशन् कुसुमाञ्जलिरन्तरे मध्ये चित्रः सन् वो युष्मान् पातु रक्षतु। नाटिकालक्षणन्तु विश्वनाथेनोक्तम्—

नाटिका कृत्प्रख्या स्यात् स्त्रीप्राया चतुरङ्किका।
प्रख्यातो धीरललितस्तत्र स्यान्नायको नृपः॥
स्यादन्तःपुरसम्बद्धा सङ्गीतव्याप्रृताथवा।
नवानुरागा कन्यात्र नायिका नृपवंशजा॥

Digitized by Google

अपिच

औत्सुक्येन कृतत्वरा सहभुवा व्यावर्त्तमाना ह्रिया,
तैस्तैर्बन्धुवधूजनस्य वचनैर्नीतामिमुख्यं पुनः।
दृष्ट्वाग्रे वरमात्तसाध्वसरसा गौरी, नवे सङ्गमे
संरोहत्पुलका हरेण हसता श्लिष्टा, शिवायास्तु वः॥ (क)

अपिच।

संप्राप्तं मकरध्वजेन मथनं त्वत्तो मदर्थं पुरा,
तद्युक्तं बहुमार्गगां मम पुरो निर्लज्ज! वोढुस्तव।
तामेवानुनयस्व भावकुटिलां हे कृष्णकण्ठ! ग्रहं
मुञ्चेत्याह रुषा यमद्रितनया, लक्ष्मोस्, पायात् स वः॥ (ख

सञ्जवर्त्तेत नेतास्यां देव्यास्त्रासेन शङ्कितः।
देवी पुनर्भवेत् ज्येष्ठा प्रगल्भा वंशजा॥
पदे पदे मानवती तद्वशः सङ्गमो द्वयोः।
वृत्तिः स्यात् कौशिकी खल्वविमर्शः सञ्जयः पुनः" इति॥

(क) औत्सुक्येनेति। औत्सुक्येन दर्शनाद्यर्थोत्कण्ठया कृतत्वरा सत्वरं चेष्टमाना, सहभुवा सहजया ह्रिया लज्जया व्यावर्त्तमाना पश्चात् प्रतिनिवर्त्तमाना, पुनः पश्चात् बन्धूनां स्वजनानां बधूजनस्य विस्रब्धसखीजनस्येत्यर्थः। तैस्तैः पत्युः सन्निधिगमनानुकूल्यप्रयोजकैरित्यर्थः वाक्यैराभिमुख्यं सामीप्यं नीता प्राप्तिता, अग्रे सम्मुखे वरं पतिं दृष्ट्वा आत्तसाध्वसरसा विभीषिकारसं व्यञ्जयन्तीत्यर्थः। नवसङ्गमत्वादिति भावः। तेन नवे सङ्गमे इति कविनैव प्रतिपादितम्। संरोहत्पुलका उद्भवद्रोमाञ्चा गौरी हसता हरेण श्लिष्टा आलिङ्गिता सती वो युष्माकं शिवाय मङ्गलायास्तु भवतु।

(ख) संप्राप्तमिति। पुरा पूर्वस्मिन् काले मदर्थं मम कारणात् मकरध्वजेन कामेन, नीललक्ष्मणेन सहजेन च त्वत्तस्त्वत्सकाशात् मथनं

Digitized by Google

अपिच

क्रोधेद्धैर्दृष्टिपातैस्त्रिभिरुपशमिता वह्नयोऽमी त्रयोऽपि
त्रासार्त्ता ऋत्विजोऽधस्पलगणहुतोष्णीषपट्टाः पतन्ति ।
दक्षः स्तौत्यस्य पत्नी विलपति कृपणं विद्रुतं चापि देवैः
शंसन्नित्यट्टहासो मखमथनविधौ पातु दैत्यै शिवो वः ॥ (क

विनाशं विलोड़नञ्च संप्राप्तम् । हे निर्लज्ज ! लज्जाविहीन ! मम पुरोऽग्रे वक्रमार्गगां त्रिपथगां मन्दाकिनीमन्यत्र वक्रपुरुषसेविनीं वेश्यां कुजामित्यर्थः । वोढुः शिरसि धारयितुरन्यत्र उपपत्नीत्वेन गृहीतुस्तत्कार्य्यमेकत्र मदनभस्मीकरणरूपमन्यत्र वेश्याप्रहणरूपं युक्तमुभयत्रैवोचितमित्यर्थः । हे कृष्णकण्ठ ! नीलकण्ठ ! शिव ! अन्यत्र कृष्णेति च्छेदः । हे कृष्ण ! भावेन स्वभावेन कुटिलां वक्रगामिनीं नदीनां वक्रगतित्वादिति भावः । वक्रस्वभावत्वमपि व्यज्यते । अन्यत्र भावकुटिलां कुटिलप्रकृतिं तामेव मदन्तिके मन्दाकिनीमेव अन्यत्र कुजामेव अनुनयञ्च प्रसाद्य, तत्रैव निर्मलसुखस्य स्थितत्वादिति भावः । यद्दमाम् अन्यत्र कण्ठयहं तञ्च उभयत्रैव परित्यज, इति कृपा कोपेन अद्रितनया पार्वती लक्ष्मीञ्च यं महादेवं कृष्णञ्च आह उवाच, आहेति वर्त्तमानसामीप्ये भूतार्थे लट् । स शिवः कृष्णश्च वः युष्मान् पायात् रक्षतु । अत्र श्लेषालङ्कारो व्यक्त एव ।

(क) क्रोधेद्धैरिति । क्रोधेनेद्धैः प्रदीप्तैस्त्रिभिर्दृष्टिपातैर्दृष्टिक्षेपैरुक्तयः अमी वेदोक्ता इत्यर्थः वह्नयो ज्वलना उपशमिता अपि चपलैरुत्पीड़कैर्गणैः प्रमथैः हृता बलाद्गृहीता उष्णीषपट्टा येषान्ते ऋत्विजा याज्ञिकास्त्रासार्त्ता भयविह्वलाः सन्तोऽधः प्रदेशे पतन्ति । दक्षः स्तोपिता स्तौति महादेवमित्यर्थात् । अस्य दक्षस्य पत्नी कृपणं दीनं यथा भवति तथा विलपति परिदेवते, देवैश्चापि विद्रुतं पलायितं यतो-

Digitized by Google

किञ्च

जितमुडुपतिना नमः सुरेभ्यो द्विजवृषभा निरुपद्रवा भवन्तु।
भवतु च पृथिवी समृद्धशस्या प्रतपतु चन्द्रवपुर्नरेन्द्रचन्द्रः ॥(क

नान्द्यन्ते सूत्रधारः। (ख)

सूत्र। अलमतिप्रसङ्गेन। अद्याहं वसन्तोत्सवे सबहुमानमाहूय, नानादिग्देशागतेन राज्ञः श्रीहर्षदेवस्य पादपद्मोपजीविना राजसमूहेनोक्तः। यथास्मत्स्वामिना श्रीहर्षदेवेनापूर्ववस्तुरचनालङ्कृता रत्नावली नाम नाटिका कृतेत्यस्माभिः श्रोत्रपरम्परया श्रुता, न तु प्रयोगतो दृष्टा, तत्तस्यैव राज्ञः सकलजनहृदयाह्लादिनो बहुमानादस्मासु चानुग्रह-

---

भावे निष्ठा। मखमथनविधौ दक्षयज्ञध्वंसानुष्ठाने देव्यै पत्न्यै दृति शंसन् कथयन् क्रियार्थोपपादाच्चतुर्थी। अट्टो भीषणो हासो यस्य स शिवः वः पातु।

(क) जितमिति। उडुपतिना चन्द्रेण जितं चन्द्रस्य जयो जात इत्यर्थः। जितमिति भावे निष्ठा। सुरेभ्यो नमस्कारान् नमस्कुर्महे इत्यर्थः। द्विजवृषभा द्विजश्रेष्ठा निरुपद्रवा उपद्रवरहिता भवन्तु। पृथिवी च समृद्धशस्या शस्यफलमूलसम्पत्तिसम्पन्ना भवतु। चन्द्रवपुः सादृश्यलक्षणया तत्तुल्यकान्तिर्नरेन्द्रचन्द्रः राजर्षभः श्रीहर्षदेवः प्रतपतु प्रतापशाली भवत्वित्यर्थः।

(ख) नान्द्यन्ते सूत्रधारः। नान्दीलक्षणं यदुक्तं विश्वनाथेन, आशीर्वचनसंयुक्ता नित्यं यस्मात् प्रयुज्यते। देवद्विजनृपादीनां तस्मान्नान्दीति संज्ञिता ॥ मङ्गल्यशंसिचन्द्रार्कोकैरवैः शिनी। पादैर्युक्ता द्वादशभिरष्टाभिर्वा पदैरुतेति। अत्र द्वादशभिरष्टाभिर्वा पदै-

Digitized by Google

बुद्ध्या यथावत्प्रयोगेण त्वया नाटयितव्येति। परिक्रम्यावलोक्य च। तद्यावदिदानीं नेपथ्यरचनां कृत्वा, यथाभिलषितं सम्पादयामि। परिषदमवलोक्य। अये आवर्जितानीव सकलसामाजिकानां मनांसीति मे निश्चयः। यतः

श्रीहर्षो निपुणः कविः परिषदप्येषा गुणग्राहिणी
लोके हारि च वत्सराजचरितं नाट्ये च दक्षा वयम्।
वस्त्वेकैकमपीह वाञ्छितफलप्राप्तेः पदं, किं पुनर्-
मद्भाग्योपचयादयं समुदितः सर्व्वो गुणानां गणः॥ (क)

तद्यावदहं गृहं गत्वा गृहिणीमाहूय, सङ्गीतकमनुतिष्ठामि। परिक्रम्य नेपथ्याभिमुखमवलोक्य च। इदमस्मदीयं गृहं यावत्प्रविशामि। प्रविश्य उच्चैः। आर्य्ये! दृतस्तावत्।

कृतेति नियमात् विंशतिपदैः कथन्तरां नान्दीलक्षणं सङ्क्षेपेत्वाशङ्क्य प्रथमोक्तस्य श्लोकत्रयस्य परस्परं यथाक्रमसन्निवेशितशब्दार्थान्वयसाहचर्य्येण चतुष्पदत्वमिति सङ्क्षेपः। अनन्तरं प्रथमोक्तस्य श्लोकद्वयस्य च अष्टपदत्वात् मिलित्वा द्वादशपदत्वमन्यथा प्रक्रमभङ्गो अन्यासङ्गतिश्चोपपादयातामिति तात्पर्यं द्रष्टव्यम्।

(क) श्रीहर्ष इति। श्रीहर्षो महाराजः निपुणः प्रवीणः दक्ष इति यावत् कविः कवितायणेता। एषा परिषत् सभापि गुणग्राहिणी गुणज्ञा। वत्सराजस्योदयनस्य चरितं कथा लोके जगति हारि मनोहरञ्च, वयञ्च नटादयो नाट्ये नटाभिनेतव्याभिनयकर्मणि दक्षाः कुशला इत्यर्थः। इह विषये एकैकमपि न पुनः सर्वमित्यर्थः। वस्तु वाञ्छितस्य सभासन्तोषरूपस्य फलस्य प्राप्तेः पदं स्थानं मद्भाग्यस्य उपचयात् वृद्धिवशात् अयं सर्वः सर्वप्रकारो गुणानां गणः समूहः समुदित उत्पन्नः, किं पुनरवश्यमेवात्र ममैव भाग्यं कारणमिति यावत्।

Digitized by Google

प्रविश्य नटी। अज्जउत्त! इअम्हि, आणवेदु अज्जो, को णिओओ अणुचिट्ठीअदुत्ति (१)

सूत्र। आर्य्ये! रत्नावलीदर्शनोत्सुकोऽयं राजलोकः, तदुद्गृह्यतां नेपथ्यम्।

नटी। निश्वस्य सावेगम्। अज्ज! णिच्चिन्तो दाणिं सि तुमं, ता कीस ण णच्चसि, मह उण मन्दभाआए एक्का जेव्व दुहिदा, सावि तुए कहिंवि देसन्तरे दिण्णा, कहं एव्वं दूरदेसट्ठिदेण भत्तुणा सह से पाणिग्गहणं भविस्सदित्ति, इमाए चिन्ताए अप्पावि मे ण पडिभादि, ता किं उण णच्चिदव्वं (२)।

सूत्र। आर्य्ये! दूरस्थेनेत्यलमुद्वेगेन। पश्य

द्वीपादन्यस्मादपि मध्यादपि जलनिधेर्दिशोऽप्यन्तात्।
आनीय झटिति घटयति विधिरभिमतमभिमुखीभूतः॥ (क)

---

(१) आर्यपुत्र! इयमस्मि आज्ञापयतु, आर्यः को नियोगः अनुष्ठीयतामिति।

(२) आर्यपुत्र! निश्चिन्ता इदानीमसि त्वं, तस्मात्कथं न नृत्यसि? मम पुनर्मन्दभाग्याया एकैव दुहिता, सापि त्वया देशान्तरे दत्ता, कथमेवं दूरदेशस्थितेन भर्त्रा सह तस्याः पाणिग्रहणं भविष्यतीति, अनया चिन्तया आत्मापि मे न प्रतिभाति, तत् किं पुनर्नर्तितव्यम्।

(क) द्वीपादिति। अन्यस्मात् प्रसिद्धसप्तसंख्यकद्वीपभिन्नात् द्वीपात् सिंहलद्वीपादित्यर्थः। जलनिधेः समुद्रस्य मध्यादपि दिशः अन्तात् दिगन्तादपि, अत्र वास्तविकदिक्शब्दस्यैक्यात् एकवचनान्तत्वमुक्तम्। उपाधिभेदादेकापि प्राच्यादिव्यपदेशभागिति न्यायमतमवलम्ब्य तथात्वमुक्तमित्यभिप्रायो बोद्धव्यः। आनीय आनयनं कृत्वा झटिति विलम्ब-

नेपथ्ये । साधु भरतपुत्र ! साधु, एवमेतत् कः सन्देहः ।

द्वीपादित्यादि पुनः पठति ।

सूत्र । आकर्ण्य नेपथ्याभिसुखमवलोक्य । आर्ये ! किमतःपरं विलम्बसे, नन्वयं मम यवीयान् भ्राता, गृहीतयौगन्धरायणभूमिकः प्राप्त एव तदेहि नेपथ्यग्रहणाय सज्जीभवावः । इति निष्क्रान्तौ ।

प्रस्तावना (क)

ततः प्रविशति यौगन्धरायणः ।

यौग । एवमेतत् कः सन्देहः । द्वीपादिति पुनः पठित्वा । अन्यथा कुतः सिद्धादेशजनितप्रत्ययप्रार्थितायाः सिंहलेश्वरदुहितुः समुद्रे यानभङ्गनिमग्नायाः फलकासादनम् ? कुतश्च कौशाम्बीयेन वणिजा सिंहलेभ्यः प्रत्यागच्छता तदवस्थायाः सम्भावनं रत्नमालाचिह्नायाः प्रत्यभिज्ञानात् दृहानयनञ्च ॥ सहर्षम् ॥ सर्वथा स्मृयन्ति नः स्वामिनमभ्युदयाः ॥ विचिन्त्य ॥ मयापि चैनां देवीहस्ते सगौरवं निक्षिपता युक्तमेवानुष्ठितं, श्रुतञ्च मया, बाभ्रव्योऽपि कञ्चुकी सिंहलेश्वरामात्येन वसुभूतिना सह कथं कथमपि समुद्रादुत्तीर्य, कौशलोच्छित्तये गतवता रुमण्वता मिलित इति । तदेवं निष्पन्नप्रायमपि प्रभुप्रयोजनं, न मे धृतिमावहतीति कष्टोऽयं खलु भृत्यभावः । यतः

भक्तत्वैव अभिसुखीभूतः सम्मुखीनो विधिर्दैवं स्रष्टा च अभिमतं वस्तु प्रियजनं वा घटयति सम्पादयतीत्यर्थः ।

(क) प्रस्तावनालक्षणन्तूक्तं दर्पणकृता, नटी विदूषको वापि पारिपार्श्विक एव वा । सूत्रधारेण सहिताः संलापं यत्र कुर्यते ।

Digitized by Google

प्रारम्भेऽस्मिन् स्वामिनो वृद्धिहेतौ
दैवेनेत्थं दत्तहस्तावलम्बे।
सिद्धे भ्रान्तिर्नास्ति सत्यं, तथापि
स्वेच्छाचारी भीत एवास्मि भर्तुः॥ (क)

नेपथ्ये कलकलः। आकर्ण्य। अये मधुरमभिहन्यमानमृदुमृदङ्गानुगतसङ्गीतमधुरः पुरः पौराणामुच्चरति चर्चरीध्वनिः, तथा तर्कयामि यदेनं मदनमहमहीयांसं पुरजनप्रमोदमवलोकयितुं प्रासादाभिमुखं प्रस्थितो देव इति। अवलोक्य। अये, कथमधिरूढ एव देवः प्रासादम्। अथ एषः,

विश्रान्तविग्रहकथो रतिमान् जनस्य
चित्ते वसन्, प्रियवसन्तक एव साक्षात्।
पर्य्युत्सुको निजमहोत्सवदर्शनाय
वत्सेश्वरः कुसुमचापइवाभ्युपैति॥ (ख)

चित्रैर्वाक्यैः स्वकार्योत्थैः प्रस्तुतान्तेऽपिभिन्नधीः। आमुखं तत्तु विज्ञेयं नाम्ना प्रस्तावनापि सेति।

(क) प्रारम्भ इति। स्वामिनो वत्सराजस्य वृद्धिहेतौ अभ्युदयहेतुके अस्मिन् प्रारम्भे रत्नावलीलाभरूप इत्यर्थः। इत्थमनेन प्रकारेण दैवेन दत्तहस्तावलम्बे विधिकृतसाहाय्ये सति, सिद्धे विषये भ्रान्तिर्भ्रमेत्यर्थात् सत्यं, नास्तीत्यनुमिनोमीत्यनुमानालङ्कारः। तथापि अनुगुणकार्थसाधनसम्पन्नत्वेऽपि स्वेच्छाचारी अहं भर्तुः स्वामिनो भीत एवास्मीति, अत्र भीत्यर्थानां भयहेतौ पञ्चमी।

(ख) विश्रान्तेति। विश्रान्ता विग्रहस्य युद्धस्य शरीरस्य च कथा यस्य, एकत्र यत्नराहित्यवशादन्यत्रानङ्गत्वादित्यर्थः। विग्रहो युद्धशरीरयोरिति विश्वः। रतिमान् अनुरागी, प्रणयवानित्यर्थः। अन्यत्र रतिसहितः, जनस्य जातावेकवचनं जनानामित्यर्थः। चित्ते वस

तद्यावद्गृहं गत्वा, कार्य्यशेषं चिन्तयामि। इति निष्क्रान्तः।

विष्कम्भकः।

ततः प्रविशत्यासनस्थो गृहीतवसन्तोत्सववेशो राजा विदूषकश्च।

राजा। सहर्षमवलोक्य। सखे वसन्तक!

विदू। आणवेदु भवं।

राजा।

राज्यं निर्जितशत्रु, योग्यसचिवे न्यस्तः समस्तो भरः,
सम्यक्पालनलालिताः प्रशमिताशेषोपसर्गाः प्रजाः।
प्रद्योतस्य सुता, वसन्तसमयस्त्वञ्चेति नाम्ना धृतिम्
कामः काममुपैत्ययं मम पुनर्मन्ये महानुत्सवः॥(क)

तिष्ठन् उभयत्रैव समानः, कामस्य तु मनसिजत्वादिति। प्रियो वसन्तकः सखा यस्य सः, अन्यत्र प्रियो वसन्तो वसन्तकालो यस्य बहुव्रीहौ शैषिकः कप्। निजमहोत्सवस्य दर्शनाय पर्य्युत्सुक उत्कण्ठित वत्सेश्वरो वत्सराजः साक्षात् तुल्यः कुसुमचापः काम इवेत्युत्प्रेक्षा अभ्युपैति समागच्छति। अत्र श्लेषसङ्कीर्णेयमुत्प्रेक्षा।

(क) राज्यमिति। राज्यं राष्ट्रं निर्जितशत्रु समुन्मूलितशत्रुकण्टकं समस्तोऽखिलः भरः सन्धिविग्रहादिसमालोचनाकार्य्यभङ्गिरित्यर्थः। योग्ये उपयुक्ते सचिवे अमात्ये न्यस्तः समर्पितः, सत्यं त्वं निश्चिन्तोऽसि तथापि प्रजापालनं के विधास्यन्तीत्याह, प्रजाः प्रकृतयः सम्यक् पालनेन रक्षणादिना लालिता राजभक्तिपान्थीकृता इत्यर्थः। तथा प्रशमिताः सम्यक् प्रशमं प्रापिता अशेषा अखिला उपसर्गा उपद्रवा यासान्तास्तथोक्ता निर्विपद इत्यर्थः। प्रद्योतस्य तन्नामकस्य सुता, मम प्रेयसी, वसन्तसमयो वसन्तकालः, त्वं रक्षस्यबन्धुस्त्वञ्च यतत् सर्वं मम सुखकरत्वेन विद्यते। सुखसाधनानि यानि राज्ञां अपे-

Digitized by Google

[illegible] वर्तस्व। भो वयस्य! एवं खेदं। अहं पुनर्जानामि, न भवतः, न कामदेवस्य, यस्यैव एकस्य ब्राह्मणवटुकस्य सर्वं यदवस्थोत्सवो, यस्य कृते पित्रवस्थेनैवं मन्यते। तत् किं पुनरनेन. प्रेक्षस्व तावदस्य मधुमत्त-कामिनीजनसंपादितहस्तोत्क्षिप्तरक्ताशोकरजोरञ्जितकौतुकस्य, समन्ततः संवृत्तमहोद्दामवर्षरीभरजसुखररव्याकुलसंभ्रमेभिः, प्रकीर्णपटवासपुष्पपि-ञ्जरितदर्शदृश्यमानस्य, सफलीकृतं यदनयोत्सवस्य।

---

(१) भो वयस्य! एवं खिद्यसे। अहं पुनर्जानामि, न भवतः, न कामदेवस्य, यस्यैव एकस्य ब्राह्मणवटुकस्य सर्वं यदवस्थोत्सवो, यस्य कृते पित्रवस्थेनैवं मन्यते। तत् किं पुनरनेन. प्रेक्षस्व तावदस्य मधुमत्त-कामिनीजनसंपादितहस्तोत्क्षिप्तरक्ताशोकरजोरञ्जितकौतुकस्य, समन्ततः संवृत्तमहोद्दामवर्षरीभरजसुखररव्याकुलसंभ्रमेभिः, प्रकीर्णपटवासपुष्पपि-ञ्जरितदर्शदृश्यमानस्य, सफलीकृतं यदनयोत्सवस्य।

चितानि तानि प्रभूतानि मम सन्तीति भावः। इति हेतोरयं कामः कन्दर्पो नाम्ना नामोच्चारणमात्रेणैव कामं यथेष्टं यथा भवति तथा तृप्तिं सन्तुष्टतां मनोरथम् उपैतु प्राप्नोतु मम पुनरमुष्य किन्तु महान् उत्-सवः मन्ये उत्प्रेक्षे इत्यर्थः।

Digitized by Google

एषा वेश्माभिलक्ष्यस्वविभवविजिताशेषवित्तेशकोषा,
कौशाम्बी ज्ञातकुम्भद्रवखचितजनैरेकपीता विभाति ॥ (क)

अपिच

धारायन्त्रविमुक्तसन्ततपयःपूरप्लुते सर्वतः
सद्यः सान्द्रविमर्दकर्दमलतक्रीडे क्षणं प्राङ्गणे।
उद्दामप्रमदाकपोलनिपतत्सिन्दूररागारुणैः
सैन्दूरीक्रियते जनेन चरणन्यासैः पुरः कुट्टिमम् ॥ (ख)

(क) कौशैरिति। कौशैर्विचित्रैः कुङ्कुमानां क्षोदैश्चूर्णैरिव गौरैर्गौरवर्णैरत एव ज्ञातं दिवसमुखमहर्मुखं यैस्तैः पिष्टातकानां पटवासनार्थं गन्धद्रव्यादीनां ओघैः समूहैः हेमालङ्काराणां सौवर्णाभरणादीनां भाभिर्भास्वरैः तथा भरनमितशिखैर्भारनम्रैः केशिरातैः किंशिरातसम्बन्धिभिः, पुष्पजनितरक्तिमवर्णैरित्यर्थः शेखरैः शिखाभिः करणैरथवा हेमालङ्कारेत्यादि शेखरविशेषणं योजनीयम्। वेश्मभूमाभिः अभिलक्ष्येण स्वकं प्रतीयमानेन स्वविभवेन स्वीयसम्पत्त्या विजितोऽशेषः समस्तो वित्तेशकोशो धनेशधनागारो यया अलकाया अप्यसाधारणधनशालित्वं ध्वन्यते। एषा दृश्यमानेत्यर्थः कौशाम्बी स्वनाम्ना प्रसिद्धा नगरी ज्ञातकुम्भानां कनकानां द्रवैः रसैः खचिता विरचिता जना लोका यत्र सा अत एव एकपीता एकं पीतं पीतवर्णो यस्याः सेव विभाति द्योतते इत्युत्प्रेक्षासङ्कीर्णोत्प्रेक्षा।

(ख) धारेति। जनेन नागरिकजनेन कर्त्रा सर्वतस्सर्वदिक्षु धारायन्त्रेभ्यः क्षरिमजलयन्त्रेभ्यो विमुक्तानां सन्ततानां प्रवाहरूपेण गच्छतां पयसां पूरैः प्रवाहैः प्लुते नितरां जलार्द्रीकृते, अत एव सद्यः व्याप्य सद्यस्तत्क्षणात् सान्द्रो घनो विमर्दो यस्य स तस्मिन् घनीभूते कर्दमे लता क्रीडा यस्मिन् तत्तथोक्ते प्राङ्गणे चत्वरे उद्दामानां नितरां क्रीडन्तीनामित्यर्थः प्रमदानां नारीणां कपोलेभ्यो गण्डेभ्यः निपतद्भिः क्षरद्भिः सिन्दूररागैः करणैरुणैरुणवर्णैश्चरणन्यासैः पादन्यासैः करणैः

Digitized by Google

प्रविश्य नटी। अज्जउत्त! इअम्हि, आणवेदु अज्जो, को णिओओ अणुचिट्ठीअदुत्ति (१)

सूत्र। आर्य्ये! रत्नावलीदर्शनोत्सुकोऽयं राजलोकः, तद्गच्छतां नेपथ्यम्।

नटी। निश्वस्य सावेगम्। अज्ज! णिच्चिन्तो दाणिं सि तुमं, ता कीस ण णच्चसि, मह उण मन्दभाआए एक्का जेव्व दुहिदा, सावि तुए कहिंवि देसन्तरे दिण्णा, कहं एव्वं दूरदेसट्ठिदेन भत्तुणा सह से पाणिग्गहणं भविस्सदित्ति, इमाए चिन्ताए अप्पावि मे ण पडिभादि, ता किं उण णच्चिदव्वं (२)।

सूत्र। आर्य्ये! दूरस्थेनेत्यलमुद्वेगेन। पश्य

द्वीपादन्यस्मादपि मध्यादपि जलनिधेर्दिशोऽप्यन्तात्।
आनीय झटिति घटयति विधिरभिमतमभिमुखीभूतः॥ (क)

---

(१) आर्यपुत्र! इयमस्मि आज्ञापयतु, आर्यः को नियोगः अनुष्ठीयतामिति।

(२) आर्यपुत्र! निश्चिन्त इदानीमसि त्वं, तस्मात्कथं न नृत्यसि? मम पुनर्मन्दभाग्यायाः एकैव दुहिता, सापि त्वया देशान्तरे दत्ता, कथमेवं दूरदेशस्थितेन भर्त्रा सह तस्याः पाणिग्रहणं भविष्यतीति, अनया चिन्तया आत्मापि मे न प्रतिभाति, ततः किं पुनर्नर्तितव्यम्।

(क) द्वीपादिति। अन्यस्मात् प्रसिद्धसप्तसंख्यकद्वीपभिन्नात् द्वीपात् सिंहलद्वीपादित्यर्थः। जलनिधेः समुद्रस्य मध्यादपि दिशः अन्तात् दिगन्तादपि, अत्र वास्तविकदिक्शब्दस्यैक्यात् एकवचनान्तत्वमुक्तम्। उपाधिभेदादेकापि प्राच्यादिव्यपदेशभागिति न्यायमतमवलम्ब्य तथात्वमुक्तमित्यभिप्रायो बोद्धव्यः। आनीय आनयनं कृत्वा झटिति विलम्ब-

नेपथ्ये । साधु भरतपुत्र ! साधु, एवमेतत् कः सन्देहः । द्वीपादित्यादि पुनः पठति ।

सूत्र । आकर्ण्य नेपथ्याभिसुखमवलोक्य । आर्ये ! किमतःपरं विलम्बसे, नन्वयं मम यवीयान् भ्राता, गृहीतयौगन्धरायणभूमिकः प्राप्त एव तदेहि नेपथ्यग्रहणाय सज्जीभवावः । इति निष्क्रान्तौ ।

प्रस्तावना (क)

ततः प्रविशति यौगन्धरायणः ।

यौग । एवमेतत् कः सन्देहः । द्वीपादिति पुनः पठित्वा । अन्यथा कः सिंहादेशजनितप्रत्ययप्रार्थितायाः सिंहलेश्वरदुहितुः समुद्रे यानभङ्गनिमग्नायाः फलकासादनम् ? कः च कौशाम्बीयेन वणिजा सिंहलेभ्यः प्रत्यागच्छता तदवस्थायाः सम्भावनं रत्नमालाचिह्नायाः प्रत्यभिज्ञानात् इहानयनञ्च ॥ सहर्षम् ॥ सर्वथा स्मृशन्ति नः स्वामिनमभ्युदयाः ॥ विचिन्त्य ॥ मयापि चैनां देवीहस्ते सगौरवं निक्षिपता युक्तमेवानुष्ठितं, श्रुतञ्च मया, बाभ्रव्योऽपि कञ्चुकी सिंहलेश्वरामात्येन वसुभूतिना सह कथं कथमपि समुद्रादुत्तीर्य, कौशलोच्छित्तये गतवता रुमण्वता मिलित इति । तदेवं निष्पन्नप्रायमपि प्रभुप्रयोजनं, न मे धृतिमावहतीति कष्टोऽयं खलु भृत्यभावः । यतः

भक्तत्वैव अभिसुखीभूतः सम्मुखीनो विधिर्दैवं स्रष्टा च अभिमतं वस्तु प्रियजनं वा घटयति सम्पादयतीत्यर्थः ।

(क) प्रस्तावनालक्षणन्तूक्तं दर्पणकृता, नटी विदूषको वापि पारिपार्श्विक एव वा । सूत्रधारेण सहिताः संलापं यत्र कुर्वते ।

Digitized by Google

प्रारम्भेऽस्मिन् स्वामिनो वृद्धिहेतौ
दैवेनेत्थं दत्तहस्तावलम्बे।
सिद्धे भ्रान्तिर्नास्ति सत्यं, तथापि
स्वेच्छाचारी भीत एवास्मि भर्तुः॥ (क)

नेपथ्ये कलकलः। आकर्ण्य। अये मधुरमभिहन्यमानमृदुमृदङ्गानुगतसङ्गीतमधुरः पुरः पौराणामुच्चरति चर्चरीध्वनिः, तथा तर्कयामि यदेनं मदनमहमहीयांसं पुरजनप्रमोदमवलोकयितुं प्रासादाभिमुखं प्रस्थितो देव इति। अवलोक्य। अये, कथमधिरूढ एव देवः प्रासादम्। अथ एषः,

विश्रान्तविग्रहकथो रतिमान् जनस्य
चित्ते वसन्, प्रियवसन्तक एव साक्षात्।
पर्य्युत्सुको निजमहोत्सवदर्शनाय
वत्सेश्वरः कुसुमचापसुवाभ्युपैति॥ (ख)

चित्रैर्वाक्यैः स्वकार्योपयोगिभिः प्रस्तुतार्थसूचकैरभिनयैः। आमुखं तत्तु विष्कम्भकं नाम्ना प्रस्तावनापि सेति।

(क) प्रारम्भ इति। स्वामिनो वत्सराजस्य वृद्धिहेतौ अभ्युदयसूचके अस्मिन् प्रारम्भे रत्नावलीलाभरूप इत्यर्थः। इत्थमनेन प्रकारेण दैवेन दत्तहस्तावलम्बे विधिकृतसाहाय्ये सति, सिद्धे विषये भ्रान्तिर्भ्रमित्यर्थात् सत्यं, नास्तीत्यनुमिनोमीत्यनुमानालङ्कारः। तथापि अनुगुणकार्यसाधनसम्बन्धत्वेऽपि स्वेच्छाचारी अहं भर्तुः स्वामिनो भीत एवास्मीति, अत्र भीत्यर्थानां भयहेतौ पञ्चमी।

(ख) विश्रान्तेति। विश्रान्ता विगतेहस्य युद्धस्य शरीरस्य च कथा यस्य, एकत्र यत्नराहित्यवशादन्यत्रानङ्गत्वादित्यर्थः। विग्रहो युद्धशरीरयोरिति विश्वः। रतिमान् अनुरागी, प्रणयवानित्यर्थः। अन्यत्र रतिसहितः, जनस्य जातावेकवचनं जनानामित्यर्थः। चित्ते वस

तथावद्गृहं गत्वा, कार्य्यशेषं चिन्तयामि। इति निष्क्रान्तः।

विष्कम्भकः।

ततः प्रविशत्यासनस्थो गृहीतवसन्तोत्सववेशो राजा विदूषकश्च।

राजा। सहर्षमवलोक्य। सखे वसन्तक!

विदू। आणवेदु भवं।

राजा।

राज्यं निर्जितशत्रु, योग्यसचिवे न्यस्तः समस्तो भरः,
सम्यक्पालनलालिताः प्रशमिताशेषोपसर्गाः प्रजाः।
प्रद्योतस्य सुता, वसन्तसमयस्त्वञ्चेति नाम्ना धृतिम्
कामः काममुपैत्ययं मम पुनर्मन्ये महानुत्सवः॥(क)

तिष्ठन् उभयत्रैव समानः, कामस्य तु मनसिजत्वादिति। प्रियो वसन्तकः सखा यस्य सः, अन्यत्र प्रियो वसन्तकालो यस्य बहुव्रीहौ शैषिकः कप्। निजमहोत्सवस्य दर्शनाय पर्य्युत्सुक उत्कण्ठित वत्सेश्वरो वत्सराजः साक्षात् तुल्यः कुसुमचापः काम इवेत्युत्प्रेक्षा अभ्युपैति समागच्छति। अत्र श्लेषसङ्कीर्णेयमुत्प्रेक्षा।

(क) राज्यमिति। राज्यं राष्ट्रं निर्जितशत्रु समुन्मूलितशत्रुकण्टकं समस्तोऽखिलः भरः सन्धिविग्रहादिसमालोचनाकार्य्यभङ्गिरित्यर्थः। योग्ये उपयुक्ते सचिवे अमात्ये न्यस्तः समर्पितः, सर्व्वं त्वं निश्चिन्तोऽसि तथापि प्रजापालनं के विधास्यन्तीत्याह, प्रजाः प्रकृतयः सम्यक् पालनेन रक्षणादिना लालिता राजभक्तिपान्थीकृता इत्यर्थः। तथा प्रशमिताः सम्यक् प्रशमं प्रापिता अशेषा अखिला उपसर्गा उपद्रवा यावान्तस्तथोक्ता निर्विघ्ना इत्यर्थः। प्रद्योतस्य तन्नामकस्य सुता, मम प्रेयसी, वसन्तसमयो वसन्तकालः, त्वं रहस्यबन्धुस्त्वञ्च एतत् सर्व्वं मम सुखकरत्वेन विद्यते। सुखसाधनानि यानि राज्ञां अन्ये-

Digitized by Google

विदू सहर्षम्। भो वअस्स! एव्वं णेदं। अहं उण जाणामि ण भवदो, ण कामदेवस्स, मम ज्जेव एक्कस्स बम्हणबडुअस्स अअं मअणमहूसवो, जस्स किदे पिअवअस्सेण एव्वं मन्तीअदि। विलोक्य। ता किं दूमिणा, पेक्ख दाव दूमस्स महुमत्तकामिणीजणसअंगाहगहिदणच्चन्तणाअरजणजणिद कोदूहलस्स, समन्तदो संवुत्तमहलोहामचच्चरीसद्दमुहररत्थामुहसोहिणो, पइण्णपडवासपुञ्जपिञ्जरिददिसामुहस्स, सम्भिरीअदं मअणमहूसवस्स (१)।

राजा। सहर्षं समन्ताद्विलोक्य। अहो परां कोटिमधिरोहति प्रमोदः पुरः पौराणाम्। तथाहि

कौर्णैः पिष्टातकौघैः कृतदिवसमुखैः कुङ्कुमक्षोदगौरै-
र्हैमालङ्कारभाभिर्भरनमितशिखैः शेखरैः केकिरातैः।

---

(१) भो वयस्य! एवं न्विदम्। अहं पुनर्जानामि, न भवतः, न कामदेवस्य, ममैव एकस्य ब्राह्मणवटुकस्य अयं मदनमहोत्सवो, यस्य कृते प्रियवयस्येनैवं मन्यते। तत् किं पुनरनेन, प्रेक्षस्व तावदस्य मधुमत्तकामिनीजनस्वयंग्राहगृहीतनृत्यरागरजनजनितकौतूहलस्य, समन्ततः संवृत्तमहालोहामचर्चरीशब्दमुखररथ्यामुखशोभिनः, प्रकीर्णपटवासपुञ्जपिञ्जरितदिङ्मुखस्य, सम्भृतां मदनमहोत्सवस्य।

ज्ञितानि तानि प्रभूतानि मम सन्तीति भावः। इति हेतोरयं कामः क्रन्दर्पो नाम्ना नामोच्चारणमात्रेणैव कामं पर्याप्तं यथा भवति तथा धृतिं लक्षणया सन्तोषम् उपैतु प्राप्नोतु मम पुनर्मम किन्तु महान् उत्सवः मन्ये उत्प्रेक्षे इत्यर्थः।

Digitized by Google

एषा वेश्माभिलक्ष्यस्वविभवविजिताशेषवित्तेशकोषा,
कौशाम्बी जातकुम्भद्रवखचितजनैर्यैकपीता विभाति ॥ (क)

अपिच

धारायन्त्रविमुक्तसन्ततपयःपूरप्लुते सर्वतः
सद्यः सान्द्रविमर्दकर्दमलतक्रीडे क्षणं प्राङ्गणे।
उद्दामप्रमदाकपोलनिपतत्सिन्दूररागारुणैः
सैन्दूरीक्रियते जनेन चरणन्यासैः पुरः कुट्टिमम् ॥ (ख)

(क) कौशैरिति। कौशैर्विचित्रैः कुङ्कुमानां क्षोदैश्चूर्णैरिव गौरैर्गौरवर्णैरत एव लतं दिवसमुखमहर्मुखं यैस्तैः पिष्टातकानां पटवासनार्थं गन्धद्रव्यादीनां ओघैः समूहैः हेमालङ्काराणां सौवर्णाभरणादीनां भाभिर्भंमूखैः तथा भरनमितशिखैर्भारनम्रैः कैङ्किरातैः किङ्किरातसम्बन्धिभिः, पुष्पजनितरक्तिमवर्णैरित्यर्थः शेखरैः शिखाभिः करणैरथवा हेमालङ्कारेत्यादि शेखरविशेषणं योजनीयम्। वेश्मभिर्भाभिः अभिलक्ष्येण स्वकं प्रतीयमानेन स्वविभवेन स्वीयसम्पत्त्या विजितोऽशेषः समस्तो वित्तेशकोशो धनेशधनागारो यया अलकाया अप्यसाधारणधनशालित्वं ध्वन्यते। एषा दृश्यमानेत्यर्थः कौशाम्बी स्वनाम्ना प्रसिद्धा नगरी जातकुम्भानां कनकानां द्रवैः रसैः खचिता विरचिता जना लोका यत्र सा अत एव एकपीता एकं पीतं पीतवर्णो यस्याः सेव विभाति द्योतते इत्युत्प्रेक्षासङ्कीर्णोत्प्रेक्षा।

(ख) धारेति। जनेन नागरिकजनेन कर्त्रा सर्वतस्तुर्दिक्षु धारायन्त्रेभ्यः क्षरिभिर्जलयन्त्रेभ्यो विमुक्तानां सन्ततानां प्रवाहरूपेण गच्छतां पयसां पूरैः प्रवाहैः प्लुते नितरां जलार्द्रीकृते, अत एव सद्यः व्याप्य सद्यस्तत्क्षणात् सान्द्रो घनो विमर्दो यस्य स सान्द्रघनीभूते कर्दमे लता क्रीडा यस्मिन् तत्तथोक्ते प्राङ्गणे चत्वरे उद्दामानां नितरां क्रीडनशीलानामित्यर्थः प्रमदानां नारीणां कपोलेभ्यो गण्डेभ्यः निपतद्भिः क्षरद्भिः सिन्दूरागैः करणैरुणैरुणवर्णैश्चरणन्यासैः पादन्यासैः करणैः

Digitized by Google

विदू। विलोक्य। एदंपि दाव सुविअड्ढजणापूरिदसिंगक्क-जलप्पहारमुक्कसिक्कारमणोहरं वारविलासिणीजणविलसितं आलोएदु पिअवअस्सो (१)।

राजा। विलोक्य। वयस्य! सम्यक् दृष्टं त्वया। कुतः

अस्मिन् प्रकीर्णपटवासकृतान्धकारे,
दृष्टो मनाङ्मणिविभूषणरश्मिजालैः।
पातालमुद्यतफणाकृतिशृङ्गकोऽयम्
मामद्य संस्मरयतीव भुजङ्गलोकः॥ (क)

विदू विलोक्य। भो वअस्स! पेक्ख, पेक्ख, एसा क्खु मअ-णिआ मअणरसविसअदत्ताभिणआ गच्छन्ती, चूदलइआए सह इदोजेव्व आअच्छदित्ति ता पेक्खदु भवम् (२)।

---

(१) इदमपि तावत् सुविदग्धजनापूरितशृङ्गकजलप्रहारसत्कृतीत्कार-मनोहरं वारविलासिनीजनविलसितम् आलोकयतु प्रियवयस्यः।

(२) भो वयस्य! पश्य पश्य, एषा खलु मदनिका मदनरसविषय-दत्ताभिनया गच्छन्ती चूतलतिकया सह इत एवागच्छति तत्पश्यतु भवान्। मदनरसरिसं वमन्ताभिणअं गच्छन्तीति पाठान्तरम्।

पुरोऽयतो दृश्यमानं कृत्रिमं वप्रभूमिः, कृत्रिमोऽस्मी विदग्धा भूरिति विश्वः। सैन्दूरीक्रियते सिन्दूरमयमिव विधीयते इत्युत्प्रेक्षा।

(क) अस्मिन्निति। प्रकीर्णैः पटवासैर्गन्धद्रव्यैः कृतान्धकारे विर-चिततिमिरे अस्मिन् लक्ष्यमाणे इत्यर्थः मणिविभूषणानां हीरकमौक्तिक-मण्डितरत्नाभरणानां रश्मिजालैः किरणपटलैर्मनाक् अल्पं दृष्टोऽयं उद्य-तानि फणेवाकृतीव येषां तानि शृङ्गकाणि यस्य स भुजङ्गलोको नाग-जनः अद्यास्मिन् लक्ष्ये मां पातालं संस्मारयतीवेत्युत्प्रेक्षा, अत्र शृङ्ग-काणां फणाकृतित्वेन सर्पत्वोत्प्रेक्षा वा चोपमया संकीर्यत इति।

Digitized by Google

ततः प्रविशतो मदनवीथां नाटयन्त्यौ द्विपदीत्रयं गायन्त्यौ चेट्यौ।

मदनिका गायति।

कुसुमाउहपिअदूअओ, मउलाइअचूअओ
सिढिलिअमाणमहणओ वाअइ दाहिणपवणओ।
विअसिअवउलामोअओ, कंखिअपिअअणमेलओ
पडिवालणअसमत्थओ भमइ जुवईसत्थओ (१)॥

इअ पढमं महुमासो जणस्स हिअआइं कुणइ मिदुलाइं।
पच्छा विअइ कामो लद्धपसरेहिं कुसुमबाणेहिं (२)॥

राजा। निर्वर्ण्य। अहो मधुरोऽयमासां निर्भरः क्रीडारसः। तथाहि

स्रस्तः स्रग्दामभ्योभां त्यजति विरचितामाकुलः केशपाशः
क्षौमाया नपुरी च द्विगुणतरमिमौ क्रन्दतः पादलग्नौ।
व्यस्तः कम्पानुबन्धादनवरतमुरो हन्ति हारोऽयमस्याः
क्रीड़न्त्याः पीड़येव स्तनभरविनमन्मध्यभङ्गानपेक्षम्॥(क)

---

(१) कुसुमायुधप्रियदूतः, सुकुलायितबकुलकूजितकः,
शिथिलितमानग्रहो वाति दक्षिणपवनकः।
विकसितबकुलामोदः काङ्क्षितप्रियजनमेलकः
प्रतिपालनासमर्थको भ्रमति युवतिसार्थः॥

(२) इदं प्रथमं मधुमासो जनस्य हृदयानि करोति व्याकुलानि पश्चात् विध्यति कामो लब्धप्रसरैः कुसुमबाणैः॥

(क) स्रस्त इति। आकुलः क्रीड़ावशात् चपलः केशपाशः कबरी, स्रस्तः स्खलितः सन् विरचितामादौ तस्मादितां स्रग्दाम्नः

Digitized by Google

विदू। सहर्षम्। भो वयस्स! अहन्धि एदाणं वज्जपरिअराणं मज्झे णच्चन्तो गायन्तो मअणमहूसवं माणइस्सं (१)

राजा। सस्मितम्। वयस्य! एवं क्रियताम्।

विदू। जं भवं आणवेदित्ति। उत्थाय तथोर्मध्ये नृत्यति। भोदि मअणिए! भोदि चूदलदिए! इदं चच्चरिअं मम्मि सिक्खावेध (२)।

मद। विहस्य। हदास! णहु चच्चरी एसा दिपदीखण्डं एदं (३)।

विदू। सहर्षम्। किं एदिणा खण्डेण मोअआ लड्डुआ वा करीअन्ति (४)।

---

(१) भो वयस्य! अहमस्यैतासां वज्रपरिकराणां मध्ये नृत्यन्, गायन्, मदनमहोत्सवं सम्मानयिष्यामि।

(२) भो मदनिके! भवति चूतलतिके! एतच्चर्चरीकं मामपि शिक्षयतम्।

(३) हताश! नहि चर्चरी एषा, द्विपदीखण्डमिदम्।

(४) भवति, एतेन खण्डेन किं मोदका लड्डुका वा क्रियन्ते।

कुसुमसञ्जः शोभां भजति, स्त्रीणामा वसन्तोत्सवे मधुरसपानात् प्रमत्तायाः पादलग्नावितौ नूपुरौ चरणालङ्कारौ द्विगुणतरमधिकतरं क्रन्दतस्य गर्ह्यायमानाविव स्थितावित्युत्प्रेक्षा। तथा क्रीड़न्त्या नृत्यन्त्या अस्या हारो व्यस्तः क्षिप्तः सन् कम्पानुबन्धात् क्षेपजन्यकम्पाद्यकात् पीड़येव पीड़ां दातुमिव स्तनभरेण विनमतो मध्यस्य मध्यदेशस्य भङ्गाय नामेत्यत्र स्तनमेव दृष्टतां वहादित्यर्थः। उरो वक्षःस्थलं कर्म क्रान्ति व्यथयतीत्यर्थः।

Digitized by Google

भद । विरुद्धं । हदास ! णहि, णहि, पठीअदि क्खु एदं (१) ।

विदू । सविआदम् । पठीअदि क्खु एवं । सविआदम् । जदू पठीअदि, ण भुञ्जीअदि, ता मम एदिणा ण कज्जम् । वरं पिअवअस्सस्स समीवं गमिस्सं (२) । यथा करोति । अपवार्योपविशति ।

नेपथ्ये । आकर्ण्यतां आकर्ण्यतां ।

विदू । आकर्णयति ।

भद । हदास ! एहि, कहिं गच्छसि, दूअस्सेव्व कीलम्ह(३) इति बहुविधं ताड़यति ।

विदू । आत्मगतं, प्रकाशं, राजानमवलोक्य । भो वअस्स ! णक्खिदोम्हि (४) ।

राजा । वयस्य ! क्रीड़ितम् ।

विदू । णहि कीलिअ पलाइदोम्हि (५) ।

---

(१) हताश ! नहि, नहि, पठ्यते खल्वेतत् ।

(२) पठ्यते खल्विदम् । यदि पठ्यते, न भुज्यते, तन्नात्मनैतेन न कार्यम् । वरं प्रियवयस्यस्य समीपं गमिष्यामि ।

(३) हताश ! एहि, कुत्र गच्छसि, दूतस्यैव क्रीड़ामः । चिट्ठ तिष्ठ कीलिकं हदास ! कहिं गच्छसि इति पाठोऽपि दृश्यते । तिष्ठ तिष्ठ क्रीड़ितं हताश ! कुत्र गच्छसि इति च० ।

(४) भो वयस्य ! नर्त्तितोऽस्मि ।

(५) नहि क्रीड़ित्वा पलायितोऽस्मि ।

Digitized by Google

चूतलतिका। हञ्जे मअणिए! चिरं क्खु अम्हेहिं कीलिदं, ता एहि, णिवेदेम्ह दाव भट्टिणीए सन्देसं महाराअस्स (१)

मद। चूदलदिए! सुट्ठु तुए सुमरिदं एदं एव्वं करेम्ह। परिक्रम्योपसृत्य च। उभे। जेदु जेदु भट्टा, देवी आणवेदि। दत्तदृष्टिके लज्जां नाटयन्त्यौ। णहि णहि, विण्णवेदि (२)

राजा। सहर्षं विहस्य सादरम्। मदनिके! नन्वाज्ञापयतीत्येव रमणीयं विशेषतोऽद्य मदनमहोत्सवे। तदुच्यतां, किमाज्ञापयति देवी।

विदू। आः दासीए धीए! किंत्ति देवी आणवेदित्ति (३)।

चेट्यौ। एवं भट्टिणी विण्णवेदि, जहा क्खु अज्ज मए मअरन्दुज्जाणं गदुअ, रत्तासोअपाअवदलट्ठिदस्स भअवदो कुसुमाउहस्स पूआ णिव्वत्तिदव्वा, तत्थ अज्जउत्तेण सण्णिहिदेण होदव्वं त्ति (४)।

राजा। वयस्य! किं वक्तव्यमुत्सवादुत्सवान्तरमापतितमिति।

---

(१) हञ्जे (सखि) मदनिके! चिरं खल्वस्माभिः क्रीडितं, तस्मादेहि, निवेदयामो देव्याः सन्देशं महाराजाय।

(२) चूतलतिके! सुष्ठु त्वया स्मृतम् इदानीमेवं कुर्मः। जयतु जयतु भर्त्ता। राजन्! देवी आज्ञापयति।

(३) दास्याः पुत्रि! किमिति देवी आज्ञापयति।

(४) एवं देवी विज्ञापयति, यथा खलु अद्य मया मकरन्दोद्याने गत्वा, रक्ताशोकपादपतलसंस्थापितस्य भगवतः कुसुमायुधस्य पूजा निर्वर्तयितव्या, तत्र चार्यपुत्रेण सन्निहितेन भवितव्यमिति।

Digitized by Google

विदू । ता उट्ठेहि, तहिं जेव्व गच्छम्ह, जेण तहिं गदस्स ममावि वम्हणबालअस्स सोत्थिवाअणं किम्पि भविस्सदित्ति(१

राजा । मदनिके ! गम्यतां, देव्यै निवेदयितुं वयमहमागत एव मकरन्दोद्यानमिति ।

चेटी । जं भट्टा आणवेदित्ति (२) । इति निष्क्रान्ते ।

राजा । वयस्य ! एष्ववतरावः ।

उभौ प्रासादावतरणं नाटयतः ।

राजा । वयस्य ! आदेशय मकरन्दोद्यानस्य मार्गम् ।

विदू । एदु भट्टा । इति परिक्रामतः ।

विदू । अग्रतोऽवलोक्य । भो एदं तं मअरन्दुज्जाणं, ता एहि पविसम्ह (३) । इति प्रविशतः ।

विदू । सविस्मयम् । भो महाराअ ! पेक्ख पेक्ख, एदं तं मलअमारुदान्दोलिअमण्डलन्तसहआरमञ्जरीरेणुपडलपडिबद्धपडुविआणं, मत्तमहुअरणिअरमुक्कझङ्कारमिलिदमहुरकोइलालावसङ्गीदसुहावहं, तुहागमणदंसिआअरं, विअ मअरंदुज्जाणं लक्खीअदि । ता पविसदु भवं (४) ।

---

(१) भो वयस्य ! तस्मादुत्तिष्ठ, तत्रैव गच्छाव, येन तत्र गतस्य मे ब्राह्मणबालकस्य स्वस्तिवाचनं किमपि भविष्यतीति ।

(२) यद्भर्त्ताज्ञापयति ।

(३) भो एतन्मकरन्दोद्यानं तस्मादागच्छ प्रविशावः ।

(४) भो महाराज ! पश्य, पश्य, एतत् खलु मलयमारुतान्दोलितमण्डलायमानसहकारमञ्जरीरेणुपटलप्रतिबद्धपटवितानम्, मत्तमधुकरनिकरमुक्तझङ्कारमिलितकोकिलालापसङ्गीतसुखावहं, त्वदागमनदर्शनादरमिव, मकरन्दोद्यानं लक्ष्यते । तस्मात् प्रविशतु भवान् ।

Digitized by Google

राजा। सप्रमादमवलोक्य। अहो रम्यता मकरन्दोद्यानस्य दृश्यते हि

उद्यद्विद्रुमकान्तिभिः किसलयैस्ताम्रां त्विषं बिभ्रतो
भृङ्गालीविरुतैः कलैरविशदव्याहारलीलाभृतः।
घूर्णन्तो मलयानिलाहतिचलैः शाखासमूहैर्मुहु-
र्भ्रान्तिं प्राप्य मधुप्रसङ्गमधुना मत्ता इवामी द्रुमाः॥ (क)

अपिच

मूले गण्डूषसेकासव इव वकुलैर्वाम्यते पुष्पवृष्ट्या,
मध्यातास्ते तरुण्या मुखमदिरनिभैश्चिराच्चम्पकान्यद्य भान्ति।
आकर्णालोकपादाहतिषु च रसतां निर्भरं नूपुराणां
झङ्कारस्यानुगीतैरनुकरणमिवारभ्यते भृङ्गसार्थैः॥ (ख)

(क) उद्यदिति। उद्यद्विद्रुमाणां नवविद्रुमाणां कान्तिरिव कान्तिर्येषामिति निदर्शनाभेदः। किसलयैः पल्लवैः करणैस्ताम्रां ताम्रवर्णां त्विषं प्रभां बिभ्रतः प्रतिपादयन्तः धारयन्त इति शेषः। मधुसेवनेन जनिताहङ्किमान इति भावः। कलैरस्फुटाक्षरैर्भृङ्गालीनां भृङ्गश्रेणीनां विरुतैर्ध्वनिभिरविशदव्याहारस्यास्फुटवचनस्य लीलां साम्यं बिभ्रतीति तद्भृतस्तत्तुल्या इव प्रतिभान्ति, मानवाश्च सुरां पीत्वा व्यक्तनादं प्रलपन्तीति भावः। मलयानिलस्याहत्याघातेन चलैः कम्पमानैः शाखासमूहैः शाखाततिभिर्मुहुर्वारं वारं घूर्णन्तो घूर्णिताः सन्तः अत्यापि तथात्वमुत्प्रेक्षते। अमी दृश्यमाना द्रुमा इत्या मधुप्रसङ्गेन वसन्ताविर्भावेण यन्मधुत्वेन भ्रान्तिं भ्रमणं प्राप्य मत्ता इवेत्युत्प्रेक्षा, सा च मत्तताया अचैतन्यधर्मित्वेनापि अचेतने तत्सम्बन्धोक्तेस्तत्सम्बन्धरूपातिशयोक्त्या संसृज्यत इति।

(ख) मूल इति। वकुलैः खनामप्रसिद्धैस्तरुभिः कर्तृभिः पुष्पवृष्ट्या करणेन मूले गण्डूषसेकासवः रमणीमुखमदिरासिक्तत्वमिव वाम्यते

Digitized by Google

विदू। आकर्ण्य। भो वयस्स! ण एदे मधुअरा: णेउरसद्दं अनुहरन्ति, णेउरसद्दो ज्जेव्व एसो देवीए परिअणस्स(१)।

राजा। वयस्य! सम्यगवधारितम्।

ततः प्रविशति वासवदत्ता काञ्चनमाला गृहीतमाल्यविलेपनव्यग्रहस्ता सागरिका विभवतश्च परिवारः।

वास। हञ्जे कञ्चणमाले! आदेसेहि मे मअरंदुज्जाणस्स मग्गं (२)।

काञ्च। एदु एदु भट्टिनी (३)। इति परिक्रामति।

वास। हञ्जे कञ्चणमाले! अध केत्तिअदूरे दाणिं सो रत्तासोअपाअवो, जहिं मए भअवदो मअणस्स पूआ णिव्वत्तइदव्वा (४)।

काञ्च। भट्टिणि! आसण्णं ज्जेव्व किं ण पेक्खदि भट्टिणी? इअं क्खु सा निरन्तरुब्भिण्णकुसुमसोहिणी भट्टिणीए परि-

---

(१) भो वयस्य! न एते मधुकरा नूपुरशब्दमनुहरन्ति नूपुरशब्द एव एव देव्याः परिजनस्य।

(२) हञ्जे काञ्चनमाले! आदेशय मकरन्दोद्यानस्य मार्गम्।

(३) एतु एतु भर्त्री।

(४) हञ्जे काञ्चनमाले! अथ कियद्दूरे स रक्ताशोकपादपः, यत्र मया भगवतः कुसुमायुधस्य पूजा निर्वर्त्तयितव्या।

उद्गीर्यते वमनं क्रियत इत्यर्थः। अद्य मधुना आताम्रे सम्यक्शोभिते तरुण्या युवत्या मुखशशिनि मुखेन्दौ चक्रकाणि चिरादु भान्ति शोभन्ते। किञ्चेति चार्थः, भङ्गसार्थैर्मधुपकुलैरशोकेषु याः पादाकृतयः तास्तु निर्भरमतिशयं रसतां शब्दं कुर्वतां नूपुराणाम् आकर्ष शब्दमित्यर्थात्। अनुगीतैः पश्चात्तद्ध्वनिभिर्झङ्कारस्यानुकरणमारभ्यत इवेत्युत्प्रेक्षा।

Digitized by Google

भट्टिदा माहवीलदा, एसा क्खु अवरा णोमालिआलदा, जाए अआलकुसुमसमुग्गमसद्दालुणा भट्टिणा अणुदिणं आआसीअदि अप्पा, ता एदं अतिक्कमिअ दीसदीज्जेव्व सो रत्तासोअपाअवो, जहिं देवी पूअ णिव्वत्तइस्सदि (१)।

वास। ता, एहि, तहिं ज्जेव्व लहुं गच्छम्ह (२)।

काञ्च। एदु एदु भट्टिणी (३)। सर्वाः परिक्रामन्ति।

वास। अअं सो रत्तासोअपादवो, जहिं अहं पूअं णिव्वत्तइस्सं, तेन हि मे पूआणिमित्ताइं उवअरणाइं उवणेहि(४)।

साग। उपसृत्य। भट्टिणि! एदं सव्वं सज्जं (५)।

वास। निरूप्यात्मगतम्। अहो पमादो परिअणस्स, जस्सज्जेव्व दंसणपधादो पअत्तेण रक्खीअदि, तस्स ज्जेव्व दिट्ठिगोअरं पडिदा भवे। भोदु, एदं दाव भणिस्सं। प्रकाशम्। हज्जे सागरिए! कीस तुमं अज्ज मअणमहूसवपराहीणे परिअणे

---

(१) भर्त्रि! आसन्नमेव किं न प्रेक्षते भर्त्री। इयं खलु सा निरन्तरोद्भिन्नकुसुमशोभिनी भर्त्रा परिग्रहीता माधवीलता, एषापि खलु अपरा नवमालिकालता यस्या अकालकुसुमोद्गमसद्भालुना भर्त्रा अनुदिवसमायास्यते आत्मा, एतदतिक्रम्य दृश्यत एव स रक्ताशोकपादपः, यत्र देवी पूजां निर्वर्त्तयिष्यति।

(२) तदेहि, तत्रैव लघु गच्छावः। लघु शीघ्रम्।

(३) एतु एतु भर्त्री।

(४) अयं स रक्ताशोकपादपः, यत्राहं पूजां निर्वर्त्तयिष्यामि। तेन हि मे पूजानिमित्तानि उपकरणानि उपनय।

(५) एतत् सर्वं सज्जम्।

Digitized by Google

सारिअं उज्झिअ इहागदा, ता तहिं ज्जेव्व लहुं गच्छ, एदं वि सव्वं पूओवअरणं कञ्चणमालाए हत्थे समप्पेहि (१)।

सारि। जं भट्टिणी आणवेदि। इति तथा कृत्वा कतिचित् पदानि गत्वा आत्मगतम्। सारिआ मए उण सुसङ्गदाए हत्थे समप्पिदा, एदम्मि अत्थि मे पेक्खिदुं कोदूहलं, किं जहा तादस्स अन्तेउरे भअवं अणङ्गो अच्चीअदि, इधवि तहज्जेव्व, अध ण वेत्ति। ता अलक्खिआ भविअ पेक्खिस्सं। परिक्रम्यावलोक्य। ता जाव इह पूआसमओ होदि, ताव अहम्पि भअवन्तं मअणं ज्जेव्व पूइदुं कुसुमाइं अवणिस्सं। इति कुसुमावचयं नाटयति(२)।

दास। कञ्चणमाले! पडिट्ठावेहि असोअमूले भअवन्तं पज्जुण्णं (३)।

---

(१) अहो प्रमादः परिजनस्य, यस्यैव दर्शनपथात् प्रयत्नेन रक्ष्यते तस्यैव दृष्टिगोचरं पतिता भवेत्, भवतु एतत् तावत् भणिष्यामि। हञ्जे सारिके! कथं त्वं मदनमहोत्सवपराधीने परिजने सारिकामुज्झित्वा अत्रागता? तस्मात् तत्रैव गच्छ, एतच्च सर्वं पूजोपकरणं कञ्चनमालाया हस्ते समर्पय। प्रमादः अनवधानता। मदनमहोत्सवपराधीने मदनमहोत्सवस्य पराधीने परतन्त्रे आमोदनिरते इत्यर्थः।

(२) यद्यपि आज्ञापयति। सारिका मया पुनः सुसङ्गतायाः हस्ते समर्पिता, इदमस्ति प्रेक्षितुं मे कौतूहलं, किं यथा तातस्यान्तःपुरे भगवानमङ्गोऽर्च्यते, अत्रापि तथैव अथ नवेति। तस्मादनभिलक्षिता भूत्वा प्रेक्षिष्ये। तद्यावत् पूजासमयो भवति तावदहमपि भगवन्तं मदनमेव पूजयितुं कुसुमान्यवचेष्यामि।

(३) कञ्चनमाले! प्रतिष्ठापय अशोकमूले भगवन्तं प्रद्युम्नम्।

Digitized by Google

वास्त्र। जं भट्टिणी आणवेदि। १ इति तथा करोति।

विदू। परिक्रम्यावलोक्य च। भो तस्स! जधा वीसन्तो णेउरसद्दो, तधा तक्केमि आअदा देवी असोअमूलंत्ति (२)।

राजा। वयस्य! सम्यगवधारितं, पश्य, इयं देवी, या किलैषा

कुसुमसुकुमारमूर्त्तिर्दधती नियमेन तनुतरं मध्यम्।
आभाति मकरकेतोः पार्श्वस्था चापयष्टिरिव। (क)

तदेनामुपसर्पावः।

राजा। उपसृत्य। प्रिये वासवदत्ते!

वास। विलोक्य। कधं अज्जउत्तो! जअदु जअदु अज्जउत्तो, अलङ्करेदु इमं देसं आसणपरिग्गहेण, एदं आसणं एत्थ उवविसदु अज्जउत्तो (३)।

---

(१) यद्भर्त्री आज्ञापयति।

(२) भो वयस्य! यथा विश्रान्तो नूपुरशब्दस्तथा तर्कयामि आगता देवी अशोकमूलमिति।

(३) कथमार्यपुत्रः, जयतु जयतु आर्यपुत्र! अलङ्करोतु इमं देशं आसनपरिग्रहेण, इदमासनम् अत्रोपविशतु आर्यपुत्रः।

(क) कुसुमेति। कुसुमानामिव सुकुमारा कोमला अन्यत्र तान्त्वेवेति कामशरस्य कुसुममयत्वादिति भावः। मूर्त्तिर्यस्याः सा नियमेन व्रतोपवासादिना अन्यत्र नियतमेव तनुतरम् अतिशयेन क्षीणं मध्यं मध्यभागं दधती धारयन्ती, अन्यत्र स्वभावत एव क्षीणं पार्श्वस्था पार्श्ववर्त्तिनी मकरकेतोः कामस्य चापयष्टिरिवेत्युत्प्रेक्षा आभाति शोभते। श्लेषसङ्कीर्णेयमुत्प्रेक्षा।

Digitized by Google

राजा । नाट्येनोपविशति ।

काञ्च । भट्टिणी, सहत्थदिण्णेहिं कुसुमकुङ्कुमचन्दनवासेहिं सोहिदं रत्तासोअपाअवं गदुअ, अच्चीअदु भअवं पज्जुण्णो (१)।

वास । उवणेहि मे पूजोवअरणाइं (२)।

काञ्च । उपनयति ।

वास । तथा करोति ।

राजा । प्रिये वासवदत्ते !

प्रत्यग्रमज्जनविशेषविविक्तकान्तिः
कौसुम्भरागरुचिरस्फुरदंशुकान्ता ।
विभ्राजसे, मकरकेतनमर्चयन्ती
बालप्रवालविटपिप्रभवा लतेव ॥ (क)

अपिच

स्पृष्टस्त्वयैष, दयिते ! स्मरपूजाव्यापृतेन हस्तेन ।
उद्भिन्नापरमृदुतरकिसलय इव लक्ष्यतेऽशोकः ॥ (ख)

---

(१) भर्त्रि ! स्वहस्तदत्तैः कुसुमकुङ्कुमचन्दनवासैरभिः शोभितं रक्ताशोकपादपं गत्वा, अर्च्यतां भगवान् प्रद्युम्नः ।

(२) उपनय मे पूजोपकरणानि ।

(क) प्रत्यग्रेति । प्रत्यग्रमज्जनेन कामार्चनार्थं कृतस्नानविशेषेण विविक्ता परिशुद्धा कान्तिः शोभा यस्याः सा कौसुम्भरागेण रुचिरः सुन्दरः अत एव स्फुरन् अंशुकान्तो यस्याः सा त्वं मकरकेतनं मदनमर्चयन्ती पूजयन्ती, बालाः प्रवाला यस्य स ताडशस्य विटपिनो वृक्षस्य प्रभव उत्पत्तिर्यस्याः सा लतेव विभ्राजसे परिशोभसे इत्यर्थः ।

(ख) स्पृष्ट इति । हे दयिते ! प्रिये ! त्वया स्मरपूजायै पूजायां वा

Digitized by Google

अपिच

अनङ्गोऽयमनङ्गत्वमद्य निन्दिष्यति ध्रुवम्।
यदनेन न सम्प्राप्तः पाणिस्पर्शोत्सवस्तव ॥ (क)

काञ्च। भट्टिणि! अच्चिदो भअवं पज्जुण्णो, ता करेहि भत्तुणो पूआसक्कारम् (१)।

वास। तेण हि उवणेहि मे कुसुमाइं विलेवणञ्च (२)।

काञ्च। भट्टिणि! एदं सव्वं सज्जं (३)

वास। नाट्येन राजानं पूजयति।

सार। गृहीतकुसुमा। हद्धी, हद्धी, कहं कुसुमलोहोक्खित्त-हिअआए अदिचिरं ज्जेव मए कदं, ता इमिणा सिन्दुवार-विडवेण ओवारिअसरीरा भविअ पेक्खामि। विलोक्य। कहं, पेक्खिदो ज्जेव अपुव्वो कुसुमाउहो, अम्हाणं ताद्दश अन्तेउरे

---

(१) भर्त्रि! अर्चितो भगवान् प्रद्युम्नः, तस्मात् कुरु भर्तुः पूजासत्कारम्।
(२) तेन हि उपनय मे कुसुमानि विलेपनञ्च।
(३) इदं सर्वं सज्जम्।

व्याकृतेन प्रयुक्तेन हस्तेन करणेन स्पृष्ट एवोऽशोकस्तरु उद्भिन्नानि अपराण्यन्यानि मृदुतराणि स्वपल्लवादपि पेलवानि किसलयान्यस्य स तादृश इव लक्ष्यते यस्या बाह्वोरेवालौकिकः सा कीदृशीति वक्तव्यं किमु इति कैमुत्यन्यायेनार्थापत्तिः।

(क) अनङ्ग इति। अयमनङ्गः कामः अद्य अनङ्गत्वं स्वीयधर्मं निन्दिष्यति अवमंस्यति ध्रुवमुत्प्रेक्षे। कुत इत्याह यदयस्मादनेनानङ्गेन तव पाणिस्पर्शः स एवोत्सवो न सम्प्राप्त एतेन रतेरप्यस्याः सौन्दर्यं द्योत्यते।

Digitized by Google

चित्तगदो अवीयदि, इह तु पच्चक्खो लक्खीअदि ! ता अहंपि इमेहिं कुसुमेहिं इह ट्ठिदा ज्जेव्व भअवन्तं कुसुमाउहं पूअइस्सम् । इति कुसुमानि प्रक्षिपति । नमो ते भअवं कुसुमाउह, सुभदंसणो मे भविस्ससि, दिट्ठं जं दट्ठव्वं, अमोघदंसणो मे भविस्ससि । इति प्रणमति । अज्जे ! दिट्ठोवि, पुणो पेक्खिदव्वो, ता जाव ण कोवि मं पेक्खदि ताव ज्जेव्व गमिस्सं (१) ।

इति निष्क्रामति ।

कञ्चु । अज्ज वसन्तअ, एहि, सम्मदं तुमंपि सोत्थिवाअणं घडिच्छेहि (२) ।

विदू । उपसर्पति ।

वास । विक्षेपकुसुमाभरणदानपूर्वकम् । अज्ज ! एदं सोत्थिवाअणं पडोच्छ । इत्यर्पयति (३) ।

---

(१) हा धिक् ! हा धिक् ! कथं कुसुमलोभात्त्वित्प्रहृदयया अतिचिरमेव मया स्थितं, तस्मादहमेव तिस्रः कुसुमवारविक्षेपेणावारितशरीरा भूत्वा प्रेक्षिष्ये । कथं, प्रेक्षितएव अपूर्वः कुसुमायुधः, अस्माकं तातस्यान्तःपुरे, चित्रगतोऽर्च्यते, इह तु प्रत्यक्षो लक्ष्यते । तस्मादहमपि एतैः कुसुमैरिहस्थितैव भगवन्तं कुसुमायुधं पूजयिष्यामि । नमस्ते भगवन् कुसुमायुध ! शुभदर्शनो मे भविष्यसि । दृष्टं यद्द्रष्टव्यं, अमोघदर्शनो मे भविष्यसि, आर्यपुत्र ! दृष्टोऽपि पुनः प्रेक्षितव्यः । तदावत् न कोऽपि प्रेक्षते तावदेव गमिष्यामि ।

(२) आर्य वसन्तक ! एहि, सम्प्रतं त्वमपि स्वस्तिवाचनिकं प्रतीच्छ ।

(३) आर्य ! इदं स्वस्तिवाचनिकं प्रतीच्छ ।

Digitized by Google

विदू। सहर्षं उत्थाय। सोत्थि भोदीए। (१)

नेपथ्ये वैतालिकः पठति।

अस्तापाङ्गसमस्तभासि नभसः पारं प्रयाते रवौ
आस्थानीं समये समं नृपजनः सायन्तने सम्प्रतम्।
संप्रत्येष सरोरुहद्युतिमुषः पादांस्तवासेवितुं
प्रीत्युत्कर्षवतो दृशामुदयनस्येन्दोरिवोद्योचते ॥(क)

सागः। श्रुत्वा, सहर्षं परिक्रम्य, राजानं दृष्ट्वा सस्पृहम्। कहं अम्हं सो राआ उअअणो णाम, जस्स अहं ताएण दिण्णा, ता परप्पेसणदूसिदं वि मे सरीरं एदस्स दंसणेण दाणिं बहुमदं संवुत्तं (२)।

राजा। कथमुत्सवापहृतचेतोभिः सन्ध्यातिक्रमोऽप्यस्माभिर्नोपलक्षितः। देवि! पश्य

उदयगिरितटान्तरितमियं प्राची सूचयति दिङ्मुखानाथम्।
परिपाण्डुना मुखेन प्रियमिव हृदयस्थितं रमणी ॥

देवि! तदुत्तिष्ठावः आवासाभ्यन्तरमेव प्रविशावः।

सर्वे। उत्थाय परिक्रामन्ति।

सागः। कधं पत्थिदा देवी, भोदु, तुरिअं गमिस्सं। राजानं

(१) स्वस्ति भवत्यै।

(२) कथमयं स राजा उदयनो नाम, यस्याहं तातेन दत्ता, तस्मात् परप्रेषणदूषितमपि मे शरीरं एतस्य दर्शनेनाद्य बहुमतं संवृत्तम्।

(क) अस्तेति। अस्ते अस्ताचले अपास्ता विक्षिप्ताः समस्ता अखिला भासो दीप्तयः किरणा इत्यर्थः येन तस्मिन् रवौ सूर्ये नभसो गगनमण्डलस्य पारं प्रयाते इति अस्तङ्गते सतीत्यर्थः। सायन्तने सायम्भवे समये आस्थानीं सभां समं युगपत् सम्प्रतं आगच्छतु एव नृपजनो राजन्यवर्गः सम्प्रतीदानीं सरोरुहाणां पद्मानां द्युतिं

अच्छृं दहा निच्चल्ल च। कधं मन्दभाइणीए मए पेक्खिदुं वि चिरं ण पारिदो अय्यं जणो (१)। इति निष्क्रान्ता।

राजा। परिक्रामन्।

देवि! त्वन्मुखपङ्कजेन यमिनः शोभातिरस्कारिणा
पश्याब्जानि विनिर्जितानि सहसा गच्छन्ति विच्छायताम्।
श्रुत्वा ते परिवारवारवनितागीतानि भृङ्गाङ्गनाः
लीयन्ते मुकुलान्तरेषु यनकैः सञ्जातलज्जा इव॥ (क)

इति निष्क्रान्ताः सर्वे।

मदनमहोत्सवो नाम

प्रथमोऽङ्कः समाप्तः।

---

(१) कथं प्रस्थिता देवी, भवतु, तदहमपि त्वरिता गमिष्यामि। हा धिक्! हा धिक्! मया मन्दभागिन्या चिरं प्रेक्षितस्यापि न पारितः अयं जनः।

क्षुभ्यन्ति चोरयन्ति ये ते तान् एकत्र कमलयोर्भाजविगीऽन्यत्र चन्द्रोदयधिया कमलिनीप्रभाहारित्व इत्यर्थः। प्रीतेरुत्कर्षं येषं कुर्वन्ति ते तान्, अथवा प्रीत्युत्कर्षं करोति विदधाति यः स एकत्र पादविशेषत्वमथवा नखजनविशेषत्वम्। इयां नेत्राणां इन्दोरिव तद्दर्शनादनन्दकत्वाच्चन्द्रस्येव उदयनस्य वत्सराजस्य पादान् चरणान् किरणांश्च उद्भीयते गायन्ति। श्लेषसंकीर्णवस्तुप्रेक्षा।

(क) देवीति। हे देवि! यमिनश्चन्द्रस्य यशसाञ्चनस्य, शोभातिरस्कारिणा शोभाजयिना, यशाकुलत्वात् कलङ्कित्वमस्येति भावः। त्वन्मुखपङ्कजेन त्वदाननपङ्कजेन विनिर्जितानि अब्जानि पद्मानि सहसा झटित्येव विच्छायतां मलिनतां यान्ति भृङ्गाङ्गनाः भृङ्गस्त्रियः ते तव परिवारवारविलासिनीनां गीतानि श्रुत्वा सञ्जातलज्जा वारवनिताव्यः पराजयादिति भावः। मुकुलान्तरेषु मुकुलमध्ये मनकैर्मन्दं मन्दं लीयन्ते लीना भवन्ति।

Digitized by Google

द्वितीयोऽङ्कः ।

—००—

ततः प्रविशति सारिकाहस्तालम्बया दहरा सुसङ्गता ।

सुसं । हड्डी ! हड्डी ! अध दाणिं मम कृत्ते इमं सारिअं णिक्खिविअ कहिं गदा मे पिअसही सागरिआ भविस्सदि । अय्यदो दहा । एसा क्खु णिउणिआ इध क्केव्व आअच्छदि ता जाव एदं पुच्छिस्सं (१) ।

ततः प्रविशति निपुणिका ।

निपु । उअलद्धो क्खु मए भट्टिणो वुत्तन्तो, ता जाव गदुअ भट्टिणीए णिवेदेमि (२) । इति परिक्रामति ।

सुसं । हला णिउणिए, कहिं दाणिं तुमं विअ ओक्खित्त-हिअआ विअ, इध दट्ठिदं म अवहीरिअ कुदो अदिद्धा-मसि (३) ।

---

(१) हा धिक् हा धिक्, अथेदानीं मम कृते इमां सारिकां निक्षिप्य कुत्र गता मे प्रियसखी सागरिका भविष्यति । एषा खलु निपुणिका इत एवागच्छति, तदावदेनां प्रक्ष्यामि ।

(२) उपलब्धो मया भर्तुर्वृत्तान्तः तदावदत्वा भर्त्रे निवेदयामि ।

(३) हला निपुणिके ! त्वं कुतेदानीं विक्षिप्तेवृत्तिहृदयेव इह स्थितां मामवधीर्य कुतोऽतिक्रामसि ।

Digitized by Google

निपु। कधं सुसङ्गदा? हला सुसङ्गदे! सुट्ठु तुए जाणिदं। एदं खु मम विम्भअस्स कारणं, अज्ज किल भट्टा सिरअपव्वदादो आअदस्स, सिरिखण्डदासणामहेअस्स धम्मिअस्स सआसादो अआलकुसुमसंजणणदोहलं सिक्खिअ, अत्तणो परिग्गहिदं णीमालिअं कुसुमसमिद्धिसोहिअं करिस्सदित्ति, तहिं एदं वुत्तन्तं देवीए जाणिदुं पेसिदत्थी, तुमं उण कहिं पत्थिदा? (१)।

सुअं। पिअसहीं सागरिअं अण्णेसिदुं (२)।

निपु। हला! दिट्ठा मए सागरिआ गहीदसमुग्गअचित्तफलअवट्टिआ समुच्छिग्गा कअलीघरं पविसन्ती, ता गच्छ पिअसही! अहं वि देवीसआसं गमिस्सं (३)।

इति निष्क्रान्ते प्रवेशकः +

---

(१) कथं प्रियसखी सुसङ्गता? सखि सुसङ्गते! सुष्ठु त्वया ज्ञातं, इदं खलु मम विस्मयस्य कारणम्। अद्य किल भर्त्ता श्रीपर्वतादागतस्य श्रीखण्डदासनामधेयस्य धार्मिकस्य सकाशात् अकालकुसुमसंजननदोहदं शिक्षित्वा आत्मनः परिगृहीतां नवमालिकां कुसुमसमृद्धिशोभितां करिष्यतीति। तत्र एनं वृत्तान्तं ज्ञातुं देव्या प्रेषितास्मि, त्वं पुनः क्व प्रस्थिता?

(२) प्रियसखीं सागरिकामन्वेष्टुम्।

(३) दृष्टा मया तव प्रियसखी सागरिका गृहीतसमुद्गकचित्रफलकवर्तिका सम्भ्रान्ता कदलीगृहं प्रविशन्ती, तद्गच्छ प्रियसखीम्, अहमपि देवीसकाशं गमिष्यामि।

+ प्रवेशकलक्षणं यथा।

प्रवेशकोऽनुदात्तोक्त्या नीचपात्रप्रयोजितः।
अङ्कद्वयान्तर्विज्ञेयः स्वयं विष्कम्भके यथा।

ततः प्रविशति गृहीतचित्रफलकवर्त्तिका सदनावस्थां नाटयन्ती सागरिका

सागः। हिअअ! पसीद, पसीद, किं इमिणा आआसमित्तफलेण दुल्लहजणप्पत्थणाणुबन्धेण। अज्ज च। जेण एव्व दिट्ठेण दे ईदिसो सन्तापो णं वट्टदि, पुणोवि, तं जणं पेक्खिदुं अहिलसन्तिति अहो दे मूढदा। अइ णिसंसहिअअ! जम्मदो पहुदि सह सम्वड्ढिअं इमं जणं परिच्चइअ, खणमेत्तदंसणपरिचिदं जणं अणुगच्छन्ती, ण लज्जेसि? अहवा को तुह दोसो, अणंगसरपडणभीदेण तुए एव्वं अज्ज ववसिदं। भोदु दाव, अणंगं उवालहिस्सं। सामर्षम्। भअवं कुसुमाउह! णिज्जिदसअलसुरासुरो भविअ, इत्थिआजणं पहरन्तो, कधं ण लज्जेसि? विचिन्त्य। अहवा अणंगोऽसि, सव्वथा मम मन्दभाइणीए इमिणा दुण्णिमित्तेण मरणंज्जेव्व उवट्टिदं। फलकमवलोक्य। ता जाव दूह ण कोपि आअच्छदि, दाव आलेक्खसमप्पिदं तं अभिमदं जणं पेक्खिअ, जहा समीहिदं तहा करिस्सं (१)।

---

(१) हृदय! प्रसीद, प्रसीद, किमनेनाकारमात्रफलकेन दुर्लभजनप्रार्थनानुबन्धेन। अन्यच्च। येनैव दृष्टेन एतादृशः सन्तापो ननु वर्त्तते, पुनरपि तं जनं प्रेक्षितुमभिलषसीति अहो ते मूढता। अयि नृशंसहृदय! जन्मतः प्रभृति सह सम्वर्द्धितं इमं जनं परित्यज्य, क्षणमात्रदर्शनपरिचितं जनमनुगच्छन् कथं न लज्जसे? अथवा कस्तव दोषः, अनङ्गशरपतनभीतेन त्वया एवमद्य व्यवसितम्। भवतु तावत्, अनङ्गमुपालप्स्ये। भगवन् कुसुमायुध! निर्जितसकलसुरासुरो भूत्वा, कथं स्त्रीजनं प्रहरन् न लज्जसे? अथवा, अनङ्गोऽसि। सर्वथा मम मन्द-

Digitized by Google

यावदन्यमेकमना भूत्वा नाट्येन फलकं गृहीत्वा लिखामि । जइवि मे अदिसङ्कवेण वेवदि अअं अदिमेत्तं अमाहत्तो, तहवि तस्स जणस्स अण्णो दंसणोवाओ णत्थित्ति, ता जहा तहा आलिहिअ णं पेक्खिस्सं (१) । इति नाट्येन लिखति ।

ततः प्रविशति कृतकृता ।

सुअं । एदं क्खु कमलीघरं, ता जाव पविसामि । प्रविश्यावलोक्य च सविस्मयम् । किं उण एसा गुरुआणुराओक्खित्तहिअआ बिअ किम्पि आलिहन्ती ण मं पेक्खदि, भोदु, ता जाव से दिट्ठिबद्धं परिहरिअ णिरूवइस्सं । खैरं पृष्ठतोऽस्याः स्थित्वा दृष्ट्वा सहर्षम् । कहं भट्ठा आलिहिदो । साहु साअरिए साहु, अहवा ण कमलाअरं वज्जिअ, राअहंसी अण्णत्थि अहिरमदि (२) ।

भाग्यायां अनुना दुर्निमित्तेन मरणमेव उपस्थितम् । तदावदिह कोऽपि नागच्छति, तावदेव आलेख्यसमर्पितं तं अभिमतं जनं प्रेक्ष्य, यथा समीहितं तथा करिष्यामि । आयासेत्यत्र आर्येति, सामर्षम् इत्यत्र साक्षम् इत्यपि पाठः ।

(१) यद्यपि मे अतिसाध्वसेन वेपते अयमतिमात्रमभ्यङ्कः, तथापि तस्य जनस्यान्यो दर्शनोपायो नास्ति इति, तस्मादाद्या तथा भवतु, आलिख्य एनं प्रेक्षिष्ये ।

(२) इदं खलु कदलीगृहं प्रविशामि । किं पुनरेषा गुर्वनुरागोत्क्षिप्तहृदया किमप्यालिखन्ती न मां पश्यतीति भवतु, तस्मादावदस्या दृष्टिपथं वर्जयित्वा निरूपयिष्यामि किमेषा आलिखतीति । कथं भर्त्री आलिखितः, साधु प्रियसखि ! साधु, अथवा कमलाकरं वर्जयित्वा राजहंसी अन्यत्र किं रमते ।

Digitized by Google

राज। सबाष्पम्। आलिखितो मया एषः, किं पुनरनवरतनिपतदश्रुसलिलेन मे दृष्टिः प्रेक्षितुं न प्रभवति। कथं प्रियसखी सुसङ्गता, प्रियसखि सुसङ्गते! इतो उपविश।

सुसं। उपविश्य फलकं गृहीत्वा दृष्ट्वा च। सहि! को एसो तुए आलिहिदो (२)।

राज। सलज्जम्। प्रवृत्तमदनसंक्षोभवेगभग्नधैर्यः (३)।

सुसं सस्मितम्। अहो ते निपुणत्वं। किं पुनः शून्यमिव चित्रं प्रतिभाति, तस्मादहमपि आलिख्य रतिसनाथं करिष्यामि (४)। वर्त्तिकां गृहीत्वा नाट्येन रतिसनाथं लिखति।

राज। विलोक्य सक्रोधम्। सहि सुसङ्गते! कीस तुए अहं एत्थ आलिहिदा? (५)।

सुसं। विहस्य। सहि! किं अकारणे कुप्यसि? जादिसो तुए कामदेवो आलिहितो, तादिसो मए रइ आलिहि-

---

(१) आलिखितो मया एषः किं पुनरनवरतनिपतदश्रुसलिलेन मे दृष्टिः प्रेक्षितुं न प्रभवति। कथं प्रियसखी सुसङ्गता, प्रियसखि सुसङ्गते! अत्रोपविश।

(२) सखि! क एष त्वया आलिखितः।

(३) प्रवृत्तमदनसंक्षोभवेगभग्नधैर्यः।

(४) अहो ते निपुणत्वम्। किं पुनः शून्यमिव चित्रं प्रतिभाति, तस्मादहमपि आलिख्य रतिसनाथं करिष्यामि।

(५) सखि! कथं त्वयाहमत्रालिखिता?

Digitized by Google

ईत्ति। ता अण्णधा संभाविअ, किं तुए एदिणा आलविदेण, कहेहि सव्वं वुत्तन्तं (१)।

बाल। खमदम्। णं आणिदत्ति पिअसहीए। प्रकाशम्। पिअसहि! महदी खु मे लज्जा, ता तहा करेसु जहा ण कोवि अवरो एदं वुत्तन्तं जाणादित्ति (२)।

दुवं। सहि! मा लज्ज, ईदिसस्स कन्दारअणस्स अवस्सं एव्व ईदिसे वरे अहिलासेण होदव्वं, तहवि जहा ण कोवि अवरो एदं वुत्तन्तं जाणिस्सदि तह करेमि। एदाए उण मेधाविणीए सारिआए एत्थ कारणेण होदव्वं, कदावि एसा इमस्स आलावस्स गहिदक्खरा कस्सवि पुरदो मन्तइस्सदित्ति (३)।

---

(१) सखि! किमकारणं कुप्यसि? यादृशस्त्वया कामदेव आलिखितः, मयापि तादृशी रतिरालिखिता, तत्कात् अन्यथासम्भाविनि! किं सर्वेतेनालापेन। कथय सर्वं वृत्तान्तम्।

(२) ननु आनाति प्रियसख्या। प्रियसखि! महती खलु मे लज्जा, तत्कात् तथा कुरुष्व यथा न कोऽपि इमं वृत्तान्तं जानातीति।

(३) सखि! मा लज्जस्व, ईदृशस्य कन्दारत्नस्य अवश्यमेव ईदृशे वरे अभिलाषेण भवितव्यम्, तथापि यथा न कोऽपि अपरं इमं वृत्तान्तं जास्यति तथा करोमि। एतया पुनः मेधाविन्या सारिकया अत्र कारणेन भवितव्यम्, एषा अस्यालापस्य गृहीताक्षरा कस्यापि पुरतो मन्त्रयिष्यतीति। अत्र कारणेन भवितव्यं इति सारिका एव अस्याकं रहस्यप्रकाशे कारणं भविष्यतीत्यर्थः। गहिदक्खरा इत्यत्र बहिदत्ता इत्यपि पाठो दृश्यते।

Digitized by Google

सागः। सखि! अदोवि मे अधिअदरं सन्दावो वट्टदि (१)। इति मदनावस्थां नाटयति।

सुसं। सागरिकाया हृदये हस्तं दत्त्वा। सहि! समस्सस समस्सस जाव दुमाए दिग्घिआए णलिणीपत्ताणि मुणालिआं अ गेण्हिअ, लहं आअच्छामि (२)। इत्युत्थाय परिक्रम्योपसृत्य च नलिनीपत्राणि गृहीत्वा, हृदये ददाति, नलिनीपत्रैः शयनं मृणालैर्वलयानि रचयित्वा, परिगृह्यानि नलिनीपत्राणि सागरिकाया हृदये निक्षिपति।

सागः। सहि! अवणेहि दुमाइं णलिणीपत्ताइं मुणालवलआइं अ, अलं एदिणा, कीस अआरणे अत्ताणं आआसेसि एं भणामि (३)।

दुल्लहजणअणुराओ, लज्जा गरुई परव्वसो अप्पा।
पिअसहि! विसमं पेम्मं, मरणं सरणं ण वरिअमेक्कं (४)॥

इति मूर्च्छति।

नेपथ्ये कलकलः।

कण्ठे कृत्तावशेषं कनकमयमधः शृङ्खलादाम कर्षन्
क्रान्त्वा हाराणि हेलाचलचरणरणत्किङ्किणीचक्रवालः।

---

(१) अतोऽपि मे अधिकतरं सन्तापो वर्त्तते। अदोपि इत्यत्र अस्त्र इत्यपि पाठः अहा इति वं०।

(२) सखि! समाश्वसिहि, समाश्वसिहि, यावदस्या दीर्घिकाया नलिनीपत्राणि मृणालिकाश्च गृहीत्वा लघु आगच्छामि।

(३) सखि! अपनय दूरात् नलिनीपत्राणि मृणालवलयानि च, अलमेतेन, कथमकारणेनात्मानमाशयसि अतु भणामि।

(४) दुर्लभजनानुरागो लज्जा गुर्वी परवश आत्मा।
प्रियसखि! विषमं प्रेम मरणं शरणं न केवलमेकम्॥

Digitized by Google

दृप्तातङ्को गणानामनुहतसरणिः सञ्जमादक्षपालेः
प्रभ्रष्टोऽयं प्लवङ्गः, प्रविशति नृपतेर्मन्दिरं मन्दरायाः ॥ (क)
अपिच
नष्टं वर्षवरैर्मनुष्यगणनाभावादपास्य त्रपाम्
अन्तः कञ्चुकिकञ्चुकस्य विशति त्रासादयं वामनः ।
पर्य्याप्तास्त्रयिभिर्निजस्य सहसं नाम्नः किरातैः कृतं
कुब्जा नोचतयैव यान्ति शनकैरालीक्षणाग्रङ्गिनः ॥ (ख)

सूत्रं । आकर्ण्य समन्युमन्युम् । सखि ! उट्ठेहि, उट्ठेहि, एसो खु दुट्ठवाणरो दूदोज्जेव्व आअच्छदि (१) ।

राग । किं दाणिं करेम्ह (२) ।

---

(१) सखि ! उत्तिष्ठ, उत्तिष्ठ, एष खलु दुष्टवानर दूत एवागच्छति ।
(२) सखि ! अत्र किमिदानीं कुर्मः ।

(क) कण्ठ इति । कण्ठे लग्नस्य छिन्नस्यावशेषमवशिष्टं कनकमयं कीलकं मुष्टिप्रहारेण वज्रनखरज्जुपार्श्वं अधःकर्षन् तथा द्वाराणि क्रान्त्वा आक्रम्य उल्लङ्घ्य प्रत्यर्थः । हेलया लीलावशेन चलयोश्चञ्चलयोश्चरणयोश्चलत् किङ्किणी चक्रवालं क्षुद्रघण्टिकासमूहो यस्य सः, अतएव गणानां उत्सवदर्शनार्थं समागतलोकवृन्दानां दृप्तातङ्कः दृप्तभयः, अश्वपालैश्चरद्भिः सञ्जमाद्वेगात् अनुहतसरणिः ज्ञातानुसरणः मन्दुरायाः प्रभ्रष्टः सन्नयं प्लवङ्गः कपिर्नृपतेर्महाराजस्य मन्दिरं गृहं प्रविशतीत्यर्थो मयूरत्वमस्येति ।

(ख) नष्टमिति । वर्षवरैः क्लीवैर्मनुष्येषु मध्ये गणनाया अभावात् हेतोरपां लज्जां अपास्य क्षिप्त्वा नष्टं खण्डं प्रलायितमित्यर्थः । अयं

Digitized by Google

सुसं। एहि इमस्सिं तमालविडवान्धआरे पविसिअ एदं अदिवाहेम्ह (१)। परिक्रम्य उभे एकान्ते पर्य्युपस्थिते।

सागः। सुसङ्गदे! कहं सुए चित्तफलओ उल्लिहिदो, कदावि कोवि तं पेक्खदि (२)।

सुसं। अइ सुत्थिदे! किं अज्जवि चित्तफलएण करिस्ससि, एसोवि दधिभक्कलंपटो एदं पञ्जरं उग्घाडिअ दुट्टवाणरो अदिक्कन्तो, एसा खु मेहाविणी उड्डीणा अण्णदो गच्छदि, ता एहि अणुसरेम्ह, इमस्स आलावस्स गहिदक्खरा कस्सवि पुरदो मन्तइस्सदि (३)।

सागः। महि! एवं करेम्ह (४)। इति परिक्रामतः।

---

(१) अस्मिन् तमालविटपान्धकारे प्रविश्यैतन्मतिवाहयामः। अतिवाहयामः इति अतिक्रमामः इत्यर्थः।

(२) सखि! कथं त्वया चित्रफलक उल्लिखितः, कदापि कोऽपि तं प्रेक्ष्यति।

(३) अयि सुस्थिते! किमद्यापि चित्रफलकेन करिष्यसि, एष दधिभक्कलम्पट एतं पञ्जरमुद्घाट्य दुष्टवानरोऽतिक्रान्तः एषा खलु मेधाविनी उड्डीना अन्यतो गच्छति, तस्मादस्माच्च लघु अनुसरामः, इमस्यालापस्य गृहीताक्षरा कस्यापि पुरतो मन्त्रयिष्यति। दधिभक्कलम्पटः दधिभक्तप्रियः।

(४) सखि! एवं कुर्मः।

वामनः खर्व्वः, तस्मात् कञ्चुकिनां कञ्चुकस्य अन्तरदप्येष्यवापि भूमेरन्यत्र विगति। पर्व्वतं प्रान्तभागं आश्रयन्ति ये तैः किरातैर्व्याधैर्नीचैः सदृशं किमेतति गच्छतीति खलु नाम सार्धक्यं कृतमित्यर्थः। कुत्रा आत्मनश्चाधस्तिनः कपि कर्त्तृकदर्थनायत्नमाना नीचतरैव गगनैरत्नं व्याप्तीत्यर्थः।

Digitized by Google

नेपथ्ये। हीही भो अच्चरिअं अच्चरिअं (१)

काम। विदूषक। सुसङ्गते! जानीषेऽपि कथं, पुनो दुट्ठ-वाअरो क्खेव्व आअच्छदि (२)।

सुखं दृष्ट्वा विहस्य। अहह कात्रे! ण भेहि, भट्टिणो परि-वासवत्ती क्खु एसो अज्जवसंतओ (३)।

ततः प्रविशति वसन्तकः।

वस। हीही भोः! अच्चरिअं अच्चरिअं, साहु रे सिरि-खण्डदास धम्मिअ, साहु (४)!

सोपहासं। वस्य कृमवलोकयति।

सुखं। सखि! किं एदिणा दिट्ठेण दूरीभूता क्खु सारिआ, ता एहि, अणुसरेम्ह (५)। इति निष्क्रान्ते।

वस। साहु रे सिरिखण्डदास धम्मिअ! साहु, जेण दिण्णमेत्तेण एव्व तेण दोहएण दूदिसी णोमालिआ सम्बु-त्ता, जेण णिरन्तरुब्भिण्णकुसुमगुच्छसोभिअविडवा उवह-न्ती विअ लक्खीअदि देवीपरिग्गहदं माहवीलदंता जाव

---

(१) हीही भोः आश्चर्यं आश्चर्यम्।

(२) सुसङ्गते! ज्ञायते कथं पुनरपि एष दुष्टवानर एवागच्छति।

(३) आर्य कातरे! न विभेहि, भर्तुः परिपार्श्ववर्त्ती खलु एष आर्य-वसन्तकः।

(४) हो हो भोः आश्चर्यं आश्चर्यम्, साधु रे श्रीखण्डदास! धार्मिक! साधु।

(५) सखि! किमेतेन दृष्टेन, दूरीभूता खलु सारिका, तस्मादागच्छ अनुसरावः।

Digitized by Google

णदुअ पिअवअस्सस्स णिवेदेमि। परिक्रम्यावलोक्य च। एसो क्खु पिअवअस्सो तस्स दोहदस्स लद्धपत्तिआदाए वरोक्खं पि तं णोमालिअं पअक्खं विअ कुसुमिदं पेक्खन्तो, हरिसप्फुल्ललोअणो इदो एव्व आअच्छदि। ता जाव णं उवसप्पामि (१)। इति राजानं प्रति निर्गतः।

ततः प्रविशति यथानिर्दिष्टो राजा।

राजा। सहर्षम्।

उद्दामोत्कलिकां विपाण्डुरतरं प्रारब्धजृम्भां चयात्
आयासं श्वसनोद्गमैरविरलैरातन्वतीमालिनः।
अक्षोद्यालतमिमां समदनां नवरोमिकान्यां भ्रुवं
पश्यन् कोपविपाटलद्युति मुखं देव्याः करिष्याम्यहम् ॥(क)
तदुत्तान्तमुपालब्धुं गतोऽसौ वसन्तकोऽद्याप्यायाति।

---

(१) साधु रे श्रीखण्डदास धार्मिक। साधु, येन दत्तमालेयैव तेन दोहदेन कैतवी नवमालिका संदृब्धा येन निरन्तरोल्लिखत्कुसुमोज्ज्वलोभित-विटपा उपहसन्तीव लक्ष्यते देवीपरिष्वक्तां माधवीलतां, तद्भावस्तु मत्वा प्रियवयस्यस्य निवेदयामि। एष खलु प्रियवयस्यस्य दोहदस्य लब्धप्रत्ययतया परोक्षामपि तां नवमालिकां प्रत्यक्षामिव कुसुमितां मन्यमानः, हर्षप्रफुल्ललोचन इत एवागच्छति। तद्भावदुपसर्पामि तम्।

(क) उद्दामेति। उद्दामोत्कलिकां अत्युत्कण्ठितां विपाण्डुरतरं अतिशयेन पाण्डुवर्णां चयात् आरब्धजृम्भां जृम्भां कुर्वतीमित्यर्थः। अविरलैर्घनैः श्वसनोद्गमैर्वायोद्गमैरातन्वतीं जनयन्तीं दीर्घोच्छ्वासान् कुर्वतीं नवमालिकां लतां अक्षिणी चक्षुषी समदनां कामवरजर्जरितामन्यां नवरोमिकां पश्यन् देव्या वासवदत्तायाः मुखं कोपेन विपाटलां द्युतिर्यस्य तत्तादृशं करिष्यामि ध्रुवं खलु।

विदूषकः। सहर्षमवलोक्य। जअदु जअदु भिअवअस्सो, भो वअस्स! दिट्ठिआ वड्ढसि जेण दिट्ठमेत्तेण (१)। इति पुनः पठति।

राजा। वयस्य! कः सन्देहः। प्रत्यक्षो हि मणिमन्त्रौषधीनां प्रभावः। पश्य

कण्ठे श्रीपुरुषोत्तमस्य समरे दृष्ट्वा वर्णिं यत्नभिः
नष्टं मन्त्रबलाद्दसन्ति वसुधामूले भुजङ्गा हताः।
पूर्वं लक्ष्मणवीरवानरभटा ये मेघनादाहताः
पीत्वा ते च महौषधेर्गुणनिधेर्गन्धं पुनर्जीविताः॥ (क)

तदादेशय मार्गम्, येन वयमपि तद्वलोकनेन चक्षुषः फलमनुभवामः।

विदू। साटोपम्। एदु एदु भवं।

राजा। गच्छामि।

उभौ सगर्वं परिक्रामतः।

---

(१) जयतु जयतु भिक्षवयस्यः, भो वयस्य! दिष्ट्या वर्द्धसे येन दृष्टमात्रेणेत्यादि।

(क) कण्ठ इति। श्रीपुरुषोत्तमस्य श्रीरामचन्द्रस्य कण्ठे समरे लङ्कायुद्धे रामरावणयोर्युद्धे वर्णिं नागपाशास्त्रं सम्बन्धभुजगं वर्णिं दृष्ट्वा कपिभिरिन्द्रजित्प्रयुक्तनागपाशैर्बन्धनं पलायितं खगराजगरुडेति भावः। मन्त्रबलाद्धता हतवीर्या भुजगाः सर्पा दशनमूले यत्नन्ति। मन्त्रौषधिवशः सर्प इति न्यायादिति भावः। पूर्वं तदानीन्तनसमये लक्ष्मणवीरस्य सौमित्रेर्ये वानरभटा वानरवलानि मेघनादेनाहता नागपाशास्त्रेण संज्ञालोपं प्रापिताश्चे गुणनिधेर्गुणकारकस्य महौषधेर्गन्धमात्रेण किमुत-

Digitized by Google

विदू । आश्चर्यं, सभयं निर्वर्ण्य, राजानं दृष्ट्वा, सत्वरम् । भो वयस्स ! एहि पलाअम्ह (१) ।

राजा । किमयम् ?

विदू । भो ! एतस्सिं घउलपादवे कोवि भूदो पडिवसदि (२) ।

राजा । धिङ्मूर्ख ! विस्रब्धं गम्यतां कुत इदृशानामत्र सम्भवः ॥

विदू । फुडक्खरं एव्वं मन्तेहि, जइ मम वअणं ण पत्तिआअसि, ता अग्गदो भविअ, सअं एव्व आअण्णेहि । (३)

राजा तथा कृत्वा स्थितो न ।

स्पष्टाक्षरमिदं तावन्मधुरं स्त्रीस्वभावतः ।
अस्पष्टत्वादनिर्ज्ञातं मन्ये वदति सारिका ॥ (क)

उभौ निरूप्य चिन्तां कृत्वा । सारिकेयम् ।

---

(१) भो वयस्य ! एहि पलायावहे ।

(२) अस्मिन् वकुलपादपे, कोऽपि भूतः प्रतिवसति ।

(३) स्फुटाक्षरमेव मन्त्रयति, यदि मम वचनं न प्रत्येषि, तदग्रतो-भूत्वा, स्वयमेव तावदाकर्णय ।

करञ्जीनामकस्यौषधस्य गन्धं कृत्वा आघ्राय पुनर्जीविता जीवितवन्तः । तेन मन्त्रिमन्त्रौषधादीनामपरिमितशक्तिकत्वमिति । नाटकपाठस्तु प्रकरणं वाल्मीकिरामायणे लङ्काकाण्डे ऽनुसन्धातव्यमिति ।

(क) स्पष्टेति । स्पष्टान्यक्षराणि यत्र तदिदं स्त्रीस्वभावतस्तावन्मधुरं मञ्जुलत्वात् सुकुमारत्वात् अनिर्ज्ञातं अनुच्चैः वाक्यमित्यर्थः सारिका वदतीत्यर्थः ।

Digitized by Google

विदू। जइ निच्चअ। कधं सच्चं एव्व सारिका ? (१)।

राजा विहस्य। एवम्।

विदू। भो वयस्स! तुमं भआलुओ, जेण सारिअं भूदेत्ति मन्तेसि (२)।

राजा। धिङ्मूर्ख! यदात्मकृतं तन्मयि संभावयसि।

विदू। भो! जइ एव्वं मा खलु मं णिवारेसि। सरोसं दण्डकाष्ठमुद्यम्य। आ दासिए सारिए! तुमं जाणासि सच्चं एव्वं बम्हणो भाअदि त्ति, ता इमिणा पिसुणजणहिअअ-कुडिलेण दण्डकट्ठेण परिपक्कं विअ कइत्थफलं, इमादो बउलपादवादो आहणिअ पाडइस्सं (३)। इति हन्तुमुद्यतः।

राजा। निवारयन्। मूर्ख! श्रूयताम्, किमप्येषा रमणीयं व्याहरति, तत्किमेनां त्रासयसि। उभावाकर्णयतः।

विदू। आकर्ण्य। एव्वं भणादि इमस्स बम्हणस्स भोजणं दिज्जे इति (४)।

राजा। सर्वमप्यौदरिकस्याभ्यवहार एव पर्यवस्यति, तत्सत्यं वद किमालपति सारिका।

विदू। आकर्ण्य। एव्वं भणादि, संहि! कीस तुए एत्थ

---

(१) कथं सत्यमेव सारिका ?

(२) भो वयस्य! त्वं भीरुः, येन सारिका भूत इति मन्त्रयसि।

(३) भो! यद्येवं तदा मा खलु मां निवारय। अरे दासि सारिके! ब्राह्मणो विभेति, अनेन पिशुनजनहृदयकुटिलेन दण्डकाष्ठेन, परिपक्वमिव कपित्थफलं, बकुलपादपात् आहत्य पातयिष्यामि।

(४) एवं भणति, अस्मै ब्राह्मणाय भोजनं देहीति।

Digitized by Google

चित्तफलए अहं आलिहिदा ? सहि ! किं अकारणे कुप्पसि जादिसो तुए कामदेवो आलिहिदो, तादिसो रदी मए आलिहिदेत्ति, ता भो वअस्स ! किं खेदं (१)।

राजा। वयस्य ! एवं तर्कयामि, कयापि हृदयवल्लभोऽनुरागादभिलिख्य कामदेवव्यपदेशेन सखीपुरतः अपह्नुतः, तत्सख्या अपि प्रत्यभिज्ञाय वैदग्ध्यादसावपि तत्रैव रतिव्यपदेशेन आलिखतेति।

विदू। भो वयस्स ! जुज्जदि जुज्जदि (२)। इति कोटिकां ददाति।

राजा। भो वयस्य ! तूष्णीं भवः, पुनरपि व्याहरति, तच्छृणवस्तावत्। उभावपि शृणुतः।

विदू। भो वयस्स ! एव्वं भणादि। सहि ! मा लज्ज, ईदिसस्स कन्दारअणस्स ईदिसे वरे अहिलासेण होदव्वं (३)।

राजा। अस्ति कापि युक्तिः।

विदू। भो वयस्स ! मा पण्डिअगव्वं उव्वह, अहं दे एदाए मुहादो सुणिअ, सव्वं वाक्खाणइस्सं, जा एसा आलिहिदा सा कण्णा दंसणीआ (४)।

---

(१) एवं भणति, सखि ! कथं त्वयात्र चित्रफलकेऽहमालिखिता ? सखि ! किं अकारणे कुप्यसि, यादृशस्त्वया कामदेव आलिखितस्तादृशी रतिर्मया आलिखिता इति, तस्मात् भो वयस्य ! किं नु इदम्।

(२) भो वयस्य ! युज्यते युज्यते।

(३) भो भवस्य ! एवं भणति सखि ! मा लज्ज, ईदृशस्य कन्दारत्नस्य ईदृशवरे अभिलाषेण भवितव्यम्।

(४) भो वयस्य ! मा पाण्डित्यगर्वमुद्वह, अहं ते एतस्या मुखात् श्रुत्वा सर्वं व्याख्यास्यामि, या एषा आलिखिता सा कन्या दर्शनीया।

Digitized by Google

राजा। वयस्य! यद्येवमवहितैरेव श्रोतव्यं अस्त्यवकाशो नः कुतूहलस्य।

विदू। भो वअस्स! सुदं तुए, जं एदाए मन्तिदं? सखि! अवणेहि मे इमाइं णलिणीपत्ताइं मुणालिआवलआइं अ, कीस अआरणे अत्ताणं आआसेसि (१)।

राजा। वयस्य! न केवलं श्रुतमभिप्रायोऽपि बुद्धः।

विदू। भो! अज्जवि कुरुकुरायदि। एव्वं एसा सारिआ, दासीए धीआ, ता सव्वं सुणिअ वक्खाणइस्सं (२)।

राजा। युक्तमभिहितम्। पुनराकर्णयतः।

विदू। भो वयस्स! एसा क्खु सारिआ, दासीए दुहिदा चउव्वेदी बम्हणी विअ, रिचाइं भणिदुं पउत्ता (३)।

राजा। वयस्य! कथय किमप्यन्यचेतसा मया नावधारितं, किमनयोक्तमिति।

विदू। भो! एव्वं भणादि। इच्छेति पुनः पठति।

राजा। वयस्य! एवम्विधं भवन्तं ब्राह्मणं मुक्त्वा, कोऽन्य एवंविधानामृचामभिज्ञः?

विदू। तदो किं णु एदं? (४)।

---

(१) भो वयस्य! श्रुतं त्वया यदेतया मन्त्रितम्। सखि! अपनय मे नलिनीपत्राणि मृणालवलयानि च, किमकारणमात्मानमायासयसि।

(२) भो! अद्यापि कुरुकुरायत्येव एषा सारिका, दास्याः पुत्री, तस्मात् सर्वं श्रुत्वा व्याख्यास्यामि।

(३) भो वयस्य! एषा खलु सारिका दासीदुहिता, चतुर्वेदी ब्राह्मणी इव ऋचः पठितुं प्रवृत्ता।

(४) ततः किं नु खल्वेतत्?

Digitized by Google

राजा। नन्वु गार्थिनेयम्।

विदू। किं गाधिआ, तदो किं कहिआ? (१)।

राजा। वयस्य! कथापि श्लाघ्ययौवनया प्रियतममनासादयन्त्या जीवितनिरपेक्षयोत्कम्।

विदू। उच्चैर्विहस्य। भोः किं एदेहिं वक्कभणिदेहिं? उजुअं एव्व किं ण भणासि, जधा मं एव्व अणासादअन्तीएत्ति? अण्णहा, को अण्णो कुसुमचावव्ववदेसेण णिहूवीअदि (२)। हस्ततालं दत्वा उच्चैर्विहसति।

राजा। ऊर्ध्वमवलोक्य। धिङ्मूर्ख! किमुच्चैर्विहसता त्वया त्रासितेयं, येनोड्डीय अन्यत्र क्वापि गता। इति निरूपयतः।

विदू। विलोक्य। एसा कअलीघरं एव्व गदा, ता एहि अणुसरेम्ह (३)। इति परिक्रामतः।

राजा। दुर्वारां कुसुमशरव्यथां वहन्त्या
तन्वङ्ग्या यदभिहितं पुरः सखीनाम्।
तद्भूयः शिशुशुकसारिकाभिरुक्तं
धन्यानां श्रवणपथातिथित्वमेति॥ (क)

---

(१) किं गार्थिका, तदा किं कथ्यताम्?

(२) भोः! किमेतैर्वक्रभणितैः? ऋजुकमेव किं न भणसि, यथा मामेवानासादयन्त्या इति, अन्यथा कोऽन्यः कुसुमचापव्यपदेशेन निह्नूयते।

(३) एषा कदलीगृहमेव गता, तस्मादागच्छ अनुसरामः।

(क) दुर्वारामिति। दुर्वारां वारयितुमशक्यां कुसुमशरव्यथां कामजनितपीडां वहन्त्या धारयन्त्या तन्वङ्ग्या क्षीणाङ्ग्या सखीनां पुरोऽग्रे यदभिहितं कथितं, शिशवो ये शुकाः सारिकाश्च तैरुक्तं तद्वचः भूयः पुनः

विदू। भो वअस्स! इदं खलु कअलीघरअं, जाव पविसम्ह (१)। इति प्रविशतः।

विदू। किं एदाए दासीए धीआए सारिआए? इह दाव मन्दमारुदुव्वेल्लन्तवालअलीदलसीअले सिलातले उपविसिअ, मुहुत्तअं वीसमम्ह (२)।

राजा। यदभिरुचितं भवते। इत्युपविशतः।

राजा। दुर्वारमिति पुनः पठति।

विदू। पार्श्वतोऽवलोक्य। भो वयस्स! एदेण उग्घाडिअदुवारेण दुट्ठवाणरेण, ताए सारिआए पञ्जरेण होदव्वं (३)।

राजा। वयस्य! निरूप्यताम्।

विदू। जं भवं आणवेदि। परिक्रम्यावलोक्य च। एस चित्तफलओ! जाव णं गेण्हामि। गृहीत्वा निरूप्य च सहर्षम्। भो वअस्स! दिट्ठिआ वड्ढसि (४)।

राजा। सकौतुकम्। वयस्य! किमेतत्?

विदू। भो एदं तं जं मए भणिदं, तुमं ल्लेव्व एत्थ आलि-

---

(१) भो वयस्य! इदं खलु कदलीगृहं, यावत् प्रविशामः।

(२) किमेतया दास्याः धृतया सारिकया? इह तावन्मन्दमारुतोद्वेल्लबालकदलीदलशीतले शिलातले उपविश्य, मुहूर्तं विश्रामयामः।

(३) भो वयस्य! एतेनोद्घाटितद्वारेण दुष्टवानरेण तस्याः सारिकायाः पञ्जरेण भवितव्यम्।

(४) एष चित्रफलकः, तद्गृह्णामि। भो वयस्य दिष्ट्या वर्द्धसे।

धैर्य्यानां वाक्यश्रवणेनैव कृतार्थीनामस्माकं अयमपथस्य अतिथित्वं अपचरतां एति, पुनस्तत् श्रूयत इत्यर्थः।

Digitized by Google

हिदो, अण्णहा की अणो कुसुमचापव्यवदेसेण णिद्धूवीअदि त्ति (१)।

राजा सहर्षं हस्तौ प्रसार्य। सखे! दर्शय।

विदू। ण दे दंसइस्सं। सावि कण्णआ एत्थ एव्व आलिहिदत्ति, किं पारितोसिएण विणा ईदिसं कण्णारअणं दंसीअदि? (२)।

राजा। कटकमर्पयन्नेव बलादुत्कृष्टौ त्वा पश्यति। विलोक्य सविस्मयम्। वयस्य! पश्य,

लीलावधूतपद्मा कथयन्ती पक्षपातमधिकं नः।
मानसमुपैति केयं चित्रगता राजहंसीव॥ (क)

अपिच।

विधायापूर्वं पूर्णेन्दुमस्या मुखमभूद् ध्रुवम्।
धाता निजारुनाम्भोजं निमीलनदुःस्थितः॥ (ख)

---

(१) इदं तव यन्मया भणितम्, अमेयालिखितः, अन्यथा कोऽन्यः कुसुमचापव्यपदेशेन निह्नूयते इति।

(२) न ते दर्शयिष्यामि। सापि कन्यका अत्रालिखिता। तत् किं पारितोषिकेण विना ईदृशं कन्यारत्नं दर्श्यते?

(क) लीलेति। लीलया विभ्रमादिना लीलायां च अवधूतं तिरस्कृतं कम्पितञ्च पद्मं यया सा नोऽस्माकं अत्यन्तपातमनुकूलं पक्षयोः पार्श्वेषु च कथयन्ती विदधती चित्रगता आलेख्य लिखिता राजहंसीव केयं मनसं चित्तं सरोवरञ्च उपैति। श्लिष्टोपमा।

(ख) विधायेति। धाता विधिः अस्या मुखं अपूर्वपूर्णेन्दुं अभूतपूर्वं चन्द्रमसं विधाय कृत्वा निजारुनाम्भोजस्य यद्विनिमीलनं मुकुलीभावस्तेन दुःस्थितोऽभूत् ध्रुवसूत्रे ज्ञाताम्। चन्द्रस्य हृदये पद्मसंकोचकत्वादिति भावः।

Digitized by Google

ततः प्रविशति कञ्चुकसहिता वागरिका च ।

वागरिका । ण समासादिदा अम्हेहिं सारिआ, ता चित्तफलअंदि दाव दूमाहो कअलीहराहो णीणहिअ, लहुं आगच्छम्ह (१)।

कञ्चुकी । सहि ! एवं करेम्ह (२) । इति परिक्रामतः ।

विदू । भो वयस्स ! कीस उण सा भीरुअसुही आलिहिदा (३) ।

राजा । आकर्ण्य सहि ! जहा वसन्तओ मन्तेदि तहा तक्किमि भट्टिणाए एत्थ एव्व होदव्वं, ता कअलीहरगुअन्तरिआ भविअ सुणाम (४)। इति सर्वे आकर्णयतः ।

राजा । वयस्य ! पश्य पश्य । विकाशपूर्वपूर्वेन्दुमित्यादि पुनः पठति ।

वागरिका । सहि ! दिट्ठिआ वड्ढसे, एसो दे वल्लभो, तुमं एव्व वण्णेदि (५) ।

कञ्चुकी । सज्जम् । सहि ! कीस परिहाससीलदाए इमं जणं लहुं करेसि ? । (६)

---

(१) न समासादिता अस्माभिः सारिका, तच्चित्रफलकमपि अस्मात् कदलीगृहात् नीत्वा, लघु आगच्छाव ।

(२) सखि ! एवं कुर्मः ।

(३) भोः ! कथमेषा अवनतमुखी आलिखिता ?

(४) सखि ! यथा वसन्तको मन्त्रयति, तथा तर्कयामि भर्त्राप्यत्रैव भवितव्यम्, तस्मात् कदलीगृहगुप्तान्तरिता भूत्वा शृणुवः ।

(५) सखि ! दिष्ट्या वर्द्धसे, एष ते वल्लभस्त्वामेव वर्णयति ।

(६) सखि ! किं परिहासशीलतया इमं जनं लघुं करोषि ?

Digitized by Google

विदू। राजानं चाक्षुषित्वा एवं भणामि, कीस एसा अवणेदसुही आलिहिदा (१)!

राजा। वयस्य! सारिकयैव सकलमावेदितम्।

सखं। सखि! दंसिदं सारिआए अत्तणो मेहावित्तणं (२)।

विदू। अवि सुहाअदि दे लोअणं णवेत्ति? (३)।

राग। आकर्ण्य खगतं सराध्वसम्। ण जाणे कीस एसे भणिस्सदि, जं सच्चं एव्व मरणजीविदाणं अन्तरे वट्टामि (४)।

राजा। वयस्य! सुखयतीति किमुच्यते, पश्य

श्रोणीभारयुगं व्यतीत्य, सुचिरं भ्रान्त्वा नितम्बस्थले
मध्येऽस्यास्त्रिवलीतरङ्गविषमे निष्पन्दतामागता।
मद्दृष्टिस्तृषितेव सम्प्रति शनैरारुह्य तुङ्गौ स्तनौ
साकाङ्क्षं मुहुरीक्षते जललवप्रस्यन्दिनी लोचने॥ (क)

---

(१) ननु भणामि, कथमेषावनतमुखी आलिखिता?

(२) सखि! दर्शितं सारिकया आत्मनो मेधावित्वम्।

(३) अपि सुखयति ते लोचनं नवेति?

(४) न जाने किमेव भणिष्यति, यत्सत्यमेव मरणजीवितयोरन्तरे वर्ते।

(क) श्रोणीभारेति। मद्दृष्टिः मदीया दृष्टिः श्रोणीभारयुगं श्रोणिभारसहितं जघनयुगं व्यतीत्यातिक्रम्य नितम्बस्थले जघनप्रदेशे सुचिरं बहुक्षणं भ्रान्त्वा परिभ्रम्य त्रिवलय एव तरङ्गास्तदाकारो यो विषमो मध्ये मध्यभागे निष्पन्दतामागता, तत्र स्थित्वा नाध्यत्र, गन्तुमिच्छन्नीत्यर्थः। सम्प्रति तृषितेव अपरिहृतैव तृष्णा यया सा चातकपक्षिणी वेति ध्वनिः शनैर्मन्दं मन्दं तुङ्गौ स्तनौ आरुह्य साकाङ्क्षं यथा तथा जललवप्रस्यन्दिनी अश्रुजलपरिपूर्णे लोचने मुहुरीक्षते।

Digitized by Google

वसं। सखि! श्रुतं त्वया? (१)।

साग। तुम एव्व सुणु, जाए आलेक्खविण्णासो वर्ण्णअदि (२)

विदू। फलकं निर्वर्ण्य। भो वयस्य! जस्स उण इदीसीओवि एव्वं पिअसमागमं बहु मण्णन्ति, तस्सवि उवरि अत्तणो को पराहवो जेण एत्थ एव्व ताए आलिहिदं अत्ताणअं ण पेक्खसि (३)।

राजा। निर्वर्ण्य। वयस्य! अनया लिखितोऽहमिति यत् सत्यमात्मन्येव बहुमानः तत्कथं न पश्यामि? पश्य

भाति पतितो लिखन्त्यास्तस्या बाष्पाम्बुशीकरकणौघः।
स्वेदोद्गम इव करतलसंस्पर्शादिह मे वपुषि॥ (क)

साग। आत्मगतम्। हिअअ! समस्स समस्स, मणोरहोवि दे एत्तिअं भूमिं गदो (४)।

---

(१) सखि! श्रुतं त्वया?

(२) त्वमेव शृणु, यथा आलेख्यविन्यासो वर्ण्यते।

(३) भो वयस्य! यस्य दैवस्योऽपि एवं प्रियसमागमं बहु मन्यन्ते तस्य ते आत्मनः उपरि कः पराभवः, येन दृष्टैव तया आलिखितं आत्मानं न पश्यसि।

(४) हृदय! समाश्वसिहि, समाश्वसिहि, मनोरथोऽपि ते एतावतीं भूमिं गतः।

(क) भातीति। लिखन्त्यास्तस्याः करतलसंस्पर्शात् पतितो बाष्पाम्बूनां शीकरकणानामोघः समूहः मे मम वपुषि देहे स्वेदोद्गमः पुलकोद्भेद इव भातीत्यन्वयः।

Digitized by Google

सर्वं। सखि! तुमं एव्व धण्णा, सलाहणीआ अ, जाए भट्टा एव्वं सन्तोसीअदि (१)।

विदू। मार्ग लोऽवलोक्य। भो वयस्स! एदं अवरं सरसकमलिणीदलमुणालविरइदं दुमाए एव्व मअणावत्थासूअअं सज्जीअदि (२)।

राजा। वयस्य! निपुणमुपलक्षितम्। तथाहि

परिम्लानं पीनस्तनजघनसङ्गादुभयत-
स्तनोर्मध्यस्यान्तः परिमिलनमप्राप्य हरितम्।
इदं व्यस्तन्यासं श्लथभुजलताक्षेपबलनैः
कृशाङ्ग्याः सन्तापं वदति नलिनीपत्रशयनम्॥ (क)

अपिच स्थितमुरसि विशालं पद्मिनीपत्रमेतत्
कथयति न तथान्तर्मन्मथोत्थामवस्थाम्।

---

(१) सखि! त्वमेव धन्या श्लाघनीया च, यथा भर्त्रा एवं सन्तोष्यते।

(२) भो वयस्य! इदमपरं सरसकमलिनीदलमृणालविरचितं अस्या एव मदनावस्थासूचकं क्रियते।

(क) परिम्लानमिति। पीनयो स्थूलयोः स्तनयोर्जघनयोश्च सङ्गात् सम्बन्धात् उभयतः उभयपार्श्वे परिम्लानं ग्लानिमापं तनोः कृशतायुक्तस्य मध्यस्य मध्यभागस्य अन्तर्मध्ये परिमिलनं संसर्गमप्राप्य हरितं हरितवर्णं श्लथयोर्विरहतापशिथिलितयोर्भुजलतयोराक्षेपयलनैर्विक्षेपबलनैर्व्यस्तन्यासं परितो निक्षिप्तं इदं नलिनीपत्रशयनं कमलकुसुमशय्या कृशाङ्ग्याः क्षीणाङ्ग्याः सन्तापं वदति, एतादृशकुसुमशयनं दृष्ट्वा मदनापीडा अनुमीयते इत्यर्थः।

Digitized by Google

अतिशयपरितापग्लापिताङ्ग्या यथास्राः।
स्तनयुगपरिणाहं मण्डलाभ्यां ब्रवीति ॥ (क)

विदू। नास्थेन मृणालिकां गृहीत्वा। भो वयस्स! अयं खु उअअदो अवरो ताए एव्व पीणत्थणहरकिलसन्तकोमल-मुणालहारो, ता पेक्खदु भवं ॥ (१)।

राजा। गृहीत्वोरसि विन्यस्य। अयि जड़प्रकृते।

परिच्युतस्तत्कुचकुम्भमध्यात्
किं शोषमायासि मृणालहार!
न सूक्ष्मतन्तोरपि तावकस्य
तत्रावकाशो भवतः कथं स्यात् ॥ (ख)

---

(१) भो वयस्य! अयं खलूपगतोऽपरस्त्रिया एव पीनस्तनभरक्लिष्यत्कोमल-मृणालहारः तत् पश्यतु भवान्।

(क) स्थितमिति। उरसि वक्षसि स्थितमर्पितमेतत् विशालं विस्तृतं पद्मिनीपत्रं कमलिनीदलं मत्प्रयोक्त्या कामजनितामन्तरवस्थां तथा न कथयति, अनेन न याथार्थ्यमवगम्यते। अतिशयं यथा भवति तथा परितापेन विरहसन्तापेन ग्लापिताङ्ग्या व्यथितावयवायाः अस्राः मण्डलाभ्यां चक्राकाराभ्यां यथा यादृशं स्तनयुगयोः परिणाहं विशालतां ब्रवीति अनेनस्फुटमनुमीयत इत्यर्थः।

(ख) परिच्युत इति। हे जड़प्रकृते! अवोधस्वभाव मृणालहार! तस्याः कुचौ कुम्भाविवेत्युपमितिः समासः तयोर्मध्यात् अभ्यन्तरात् परिच्युतः पतितः सन् किं कथं शोषं शुष्कतां आयासि प्राप्नोषि, इदमनौचित्यं ते इत्यर्थः। तावकस्य तव सम्बन्धिनः सूक्ष्मतन्तोर्न पुनः स्थूलस्य तवेत्यर्थः। अपि तत्र स्तनद्वयाभ्यन्तरे अवकाशः स्थानं नास्ति, भवतः स्थूलस्य कथं स्यात् तत्तु दुर्घटमेवेत्यर्थः।

Digitized by Google

सुसं। आत्मगतम्। हञ्जे, हञ्जे, गुरुआणुरागक्खित्तहिअओ भट्टा असम्बद्धं मन्तिदुं पउत्तो, ता अदो अवरं उणो जुत्तं अपेक्खिदुं, भोदु एवं दाव। प्रकाशम्। सहि! जस्स किदे तुमं आअदा, सो अअं दे पुरदो चिट्ठदि (१)।

साग। साक्षेपम्। कस्स किदे अहं आअदा? (२)।

सुसं। विहस्य। अयि असच्चसङ्किदे! णं चित्तफलअस्स, ता गेण्ह एदं (३)।

साग। सरोषम्। अहं अणिउणा क्खु तुए ईदिसाणं आलावाणं, ता अण्णदो गमिस्सं (४)। इति गन्तुमिच्छति।

सुसं। अदू असहणे! इह दाव मुहुत्तअं चिट्ठ, जाव दुमादो कअलीघरादो चित्तफलअं गेण्हिअ आअच्छामि (५)।

साग। सहि! एव्वं करेहि (६)।

सुसं। कदलीगृहाभिमुखं परिक्रामति।

विदू। सुसङ्गदां दट्ठा, सस्मयम्। भो वअस्स! पच्छादेहि एदं

---

(१) हा धिक्, हा धिक्, गुरुकानुरागक्षिप्तहृदयो भर्त्ता असम्बद्धं मन्त्रयितुं प्रवृत्तः। तस्मादतोऽपरं पुनर्न युक्तमपेक्षितुं भवतु एवं तावत्। सखि! यस्य कृते त्वमागता, सोऽयं ते पुरस्तिष्ठति।

(२) कस्य कृते अहमागता?

(३) अयि असत्यशङ्किते! ननु चित्रफलकस्य, तद्गृहाणेदम्।

(४) अहमनिपुणा खलु तवेदृशानामालापानां, तदन्यतो गमिष्यामि।

(५) अयि असहने! इह तावन्मुहूर्त्तं तिष्ठ, यावदस्मात् कदलीगृहाच्चित्रफलकं गृहीत्वा, आगच्छामि।

(६) सखि! एवं कुरु।

Digitized by Google

चित्तफलअं इमिणा कअलीपत्तेण, एसा क्खु देवीए परिचारिआ सुसङ्गदा आअदा (१)।

राजा। पटान्तेन फलकमाच्छादयति।

हंसं। उवट्ठिदे। जअदु, जअदु, भट्टा (२)!

राजा। सुसङ्गते! स्वागतमिहोपविश्यताम्।

हंसं। उपविशति।

राजा। सुसङ्गते! कथमिहस्थोऽहं भवत्या ज्ञातः।

हंसं। ण केवलं देवी, चित्तफलएण सह सव्वोवि वुत्तन्तो मए विण्णादो, ता देवीए गदुअ णिवेदइस्सं (३) इति गन्तुमिच्छति।

विदू। अपवार्य सभयम्। भो वअस्स! सव्वं सम्भावीअदि, मुहरा क्खु एसा गब्भदासी, ता परितोसेहि णं (४)।

राजा। युक्तमुक्तं भवता। सुसङ्गतां हस्ते गृहीत्वा, हस्तादवतार्य कटकं, कर्णाभरणं चात्मन उपनीय, सुसङ्गतायै दत्वा। सुसङ्गते! क्रीडामात्रमेतत्, अकारणे त्वया देवी न व्यथयितव्या।

हंसं। पसण्णो मे भट्टा, अलं सङ्काए एदिणा भट्टिणो पसाएण मए कीलिदं एव्व, ता किं कण्णाहरणेण? एसो

---

(१) भो वयस्य! प्रच्छादय इदं चित्तफलकं अनेन कदलीपत्रेण, एषा खलु देव्याः परिचारिका सुसङ्गता आगता।

(२) जयतु जयतु भर्त्ता।

(३) न केवलं देवीचित्तफलकेन सह सर्वोऽन्तोऽपि मया विज्ञातः, तत्तावद्देव्यै गत्वा निवेदयिष्यामि।

(४) भो वयस्य! सर्वं सम्भाव्यते, मुखरा एषा गर्भदासी, तत्तावत् परितोषयैनाम्।

Digitized by Google

एव्व मे गुरुओ पसाओ, जं कीस तुए एत्थ चित्तफलए अहं आलिहिदेत्ति कुविदा मे पिअसही सागरिआ चिट्ठदि, ता गदुअ, एसा पसादीअदु (१)।

राजा। ससम्भ्रमस्मित्यम्। क्वासौ? दर्शय, दर्शय।

सर्वं। एसा कअलीगुम्मन्तरिदा चिट्ठदि (२)।

विदू। भो! गेण्हामि एदं चित्तफलअं, कदावि इमिणा पुणोवि कज्जं होदि (३)।

सर्वं। इदो इदो भट्टा। सर्वे कदलीगृहान्निष्क्रान्ताः।

राजा। राजानं दृष्ट्वा, सहर्षं ससाध्वसं सकम्पञ्च स्वगतम्। एणं पेक्खिअ अदिसद्धसेण ण सक्कणोमि पदादो पदंवि गन्तुं, ता किं वा एत्थ करिस्सं? (४)।

विदू। सागरिकां दृष्ट्वा। ही ही भो! अच्चरीअं अच्चरीअं, ईदिसं कण्णआरअणं माणुसलोए ण दीसदि, ता तक्केमि पआवइणोवि एदं णिम्मविअ विम्हओ समुप्पण्णो (५)।

---

(१) प्रसन्नो मे भर्त्ता, अलं शङ्कया, एतेन भर्तुः प्रसादेन मया क्रीड़ितमेव तस्मात् किं कर्णाभरणेन? एष एव मे गुरुः प्रसादः, यत्कथं त्वया आत्म चित्रफलकेऽहमालिखितेति कुपिता मे प्रियसखी सागरिका तिष्ठति तस्मात् गत्वा, एषा प्रसाद्यताम्।

(२) एषा कदलीगुल्मान्तरिता तिष्ठति।

(३) भो! गृह्णामि इदं चित्रफलकं, कदापि अनेना कार्यं भवति॥

(४) एनं प्रेक्ष्य, अतिसाध्वसेन न शक्नोमि पदात् पदमपि गन्तुम्, तत् किं वात्र करिष्यामि?

(५) आश्चर्यमाश्चर्यं ईदृशं कन्यारत्नं मानुषलोके न दृश्यते, तस्मात् तर्कयामि प्रजापतेरपि इदं निर्माय विस्मयः समुत्पन्नः।

Digitized by Google

राजा । वयस्य ! ममाप्येवं मनसि वर्त्तते ।

दृशः पृथुतरीकृता जितनिजाब्जपत्रत्विष-
श्चतुर्भिरपि साधु साध्विति मुखैः समं व्याहृतम् ।
गिरांसि चलितानि विस्मयवशात् ध्रुवं वेधसो
विधाय ललनां जगत्त्रयललामभूतामिमाम् ॥ (क) ।

राम । सखेयं सुसङ्कृतामालोक्य । सहि ! दिट्ठिसो चित्तफलअस्सो तुए आणीदो (१) । इति गन्तुमिच्छति ।

राजा । दृष्टिं रुषा क्षिपसि, भामिनि ! यद्यपीमां
स्निग्धेयमेष्यति तथापि न रूक्षभावम् ।
त्यक्त्वा त्वरां, व्रज, पदस्खलितैरयं ते
खेदं गमिष्यति गुरुर्नितरां नितम्बः ॥ (ख)

---

(१) सखि दिष्ट्या चित्तफलकस्तया आनीतः ।

(क) दृश इति । जगत्त्रयस्य त्रिभुवनस्य ललामभूतामाभरणीभूतामिमां ललनां रमणीं विधाय कृत्वा जिता अवज्ञाता निजस्य स्वकीयस्य अब्जपत्रस्य स्वासनीभूतकमलदलस्य त्विट् याभिस्ता दृशश्चक्षूंषि पृथुतरीकृता आदौ चतुर्मुखस्य अष्टानां चक्षुषां पृथुतरत्वं नासीत् पश्चादासीदित्यभूतत्वभावे क्विः चतुर्भिर्मुखैरपि समं युगपत् साधु साध्विति व्याहृतं कथितं । तथा विस्मयवशात् अभूतपूर्व ललना दर्शनजनित विस्मयात् वेधसो ब्रह्मणश्च गिरांसि चलितानि कम्पितानि ध्रुवमित्युत्प्रेक्षायां ।

(ख) दृष्टिमिति । हे भामिनि ! प्रिये ! यद्यपीमां दृष्टिं नेत्रं रुषा कोपेन क्षिपसि मयि पातयसि, तथापि स्निग्धा अकुटिलेयं दृष्टिर्न रूक्षभावं पारुष्यं एष्यति प्राप्नुयात् कमनीयमेवेति भावः । तेन त्वरां शीघ्रगतिं त्यक्त्वा हित्वा व्रज शनैर्गच्छेत्यर्थः । अन्यथा शीघ्रगमने हानिरप्यस्तीति दर्शयन्नाह । अयं गुरुर्भारान् ते तव नितम्बः पदस्खलितैः

Digitized by Google

सुसं। भट्टा! अदिकोपणा क्खु एसा, ता अग्गहत्थेण गेण्हिअ पसादेहि णं (१)।

राजा। सानन्दम्। यथाह भवती। सागरिकां हस्ते गृहीत्वा सहर्षसुखं नाटयति।

विदू। भो एसा क्खु तुए अपुव्वा सिरी समासादिदा (२)।

राजा। वयस्य! सत्यम्।

श्रीरेषा पाणिरप्यस्याः पारिजातस्य पल्लवः।
कुतोऽन्यथा स्रवत्येष स्वेदकुल्यामृतद्रवः (क)।

सुसं। सहि! अदक्खिणासि तुमं दाणिं जा एवं भट्टिणा हत्थेण गहिदावि कोवं न मुञ्चेसि (३)।

साग। सभ्रूभङ्गम्। सुसङ्गदे! अज्जावि ण विरमेसि? (४)।

---

(१) भर्तः! अतिकोपना एषा, तस्मादग्रहस्तेन गृहीत्वा प्रसादयैनाम्।

(२) भो एषा खलु त्वया अपूर्वा श्रीः समासादिता।

(३) सखि! अदक्षिणा इदानीमपि त्वं, या एवं भर्त्रा हस्तेनावलम्बितापि कोपं न मुञ्चसि।

(४) अयि सुसङ्गते! अद्यापि न विरमसि?

स्खलितपदन्यासैरित्यर्थः। मितरां खेदं व्यथां गमिष्यति, तेन मन्दं मन्दं गच्छेति भावः।

(क) श्रीरेति। एषा श्रीर्लक्ष्मीः, अस्याः पाणिर्हस्तोऽपि पारिजातस्य एतदाख्य वृक्षस्य पल्लवः उभयोरपि सदृशजन्यत्वादिति भावः। अन्यथा श्रीत्वपारिजातपल्लवत्वा स्वीकारे स्वेदएव कुल्या यस्य सोऽयमेवोक्तद्रवः सुधाप्रख्यं कुतोहेतोः स्रवति, अत्र त्वयाणामपि पदार्थानां सदृशजातत्वात्तथात्वकल्पनोचितमिति भावः।

Digitized by Google

राजा। अयि! न खलु सखीजने युक्तमेव कोपानुबन्धं कर्त्तुम्।

विदू। भोदि! बुभुक्खिदो बम्हणो विअ किं कुप्पसि (१)।

सा.ग। सहि! तुए सह ण बोलइस्सं (२)।

राजा। अयि कोपने! नैतदुक्तं समानप्रतिपत्तिषु सखीषु।

विदू। भो! एसा क्खु अवरा देवी वासवदत्ता (३)।

राजा। सचकितं सागरिकाया हस्तं मुञ्चति।

सा.ग। सुसङ्गदे! किं दाणिं एत्थ करिस्सं (४)।

सुसं। सहि! एदं तमालविडवं अन्तरीअ इदो णिक्कमम्ह (५)। इति निष्क्रान्ते।

राजा पार्श्वतोऽवलोक्य सविस्मयम्। क्वासौ देवी वासवदत्ता?

विदू। भो! मा णं एदं, मए एसा क्खु अवरा देवी वासवदत्ता अदिदीहरोसदाएत्ति भणिदं (६)।

राजा। धिङ्मूर्खं!

प्राप्ता कथमपि दैवात् कण्ठमनीतैव सा प्रकटरागा।
रत्नावलीव कान्ता मम हस्तात् भ्रंशिता भवता॥ (क)

---

(१) भवति! बुभुक्षितो ब्राह्मण इव किं कुप्यसि?

(२) सखि! त्वया सह न वक्ष्यामि।

(३) भो एषा खलु अपरा देवी वासवदत्ता।

(४) सुसङ्गते! किमिदानीं करिष्यामि?

(५) सखि! इदं तमालविटपमन्तरयित्वा इतो निष्क्रामामः।

(६) भो! मा ननु इदं, मया एषा खलु अपरा देवी वासवदत्ता अतिदीर्घरोषतयेति भणितम्।

(क) प्राप्तेति। कथमप्यति कृच्छ्रेण दैवात् दैववलात् प्राप्ता, कण्ठं कण्ठदेशं, कण्ठालिङ्गनञ्च अनीतैव अप्राप्तिरेव, सा प्रकटः स्फुटो राग

Digitized by Google

ततः प्रविशति वासवदत्ता काञ्चनमालां च।

वास। हञ्जे कंचणमाले! अध केत्तिअदूरे दाणिं अज्जउत्तेण परिग्गहिदा णोमालिआ? (१)।

काञ्च। एदं कअलीघरं अदिक्कमिअ दीसदि (२)।

वास। तेण तहिं ज्जेव्व गच्छह्म (३)।

काञ्च। एदु एदु भट्ठिणी (४)। परिक्रामति।

राजा। वयस्य! क्वेदानीं प्रियतमा दृष्टया?

काञ्च। भट्टिणि! जह समीपे भट्टा मन्तेदि, तह तक्केमि भट्टिणीं एव्व पडिवालअन्तो चिट्ठदि, ता उपसप्पदु भट्टिणी (५)।

वास। उपसृत्य। जअदु, जअदु, अज्जउत्तो (६)।

राजा। अपवार्य वयस्य! प्रच्छादय चित्रफलकम्।

विदू गृहीत्वा कक्षे निक्षिपति।

---

(१) सखि काञ्चनमाले! अथ कियद्दूरे इदानीं सा आर्यपुत्रेण परिगृहीता नवमालिका?

(२) इदं कदलीगृहमतिक्रम्य दृश्यते।

(३) तेन तत्रैव गच्छावः।

(४) एतु एतु भर्त्री।

(५) भर्त्रि! यथा समीपे भर्त्ता मन्त्रयति, तथा तर्कयामि भर्त्रीमिव परिपालयन्तिष्ठति, तस्मादुपसर्पतु भर्त्री।

(६) जयतु जयतु आर्यपुत्रः।

वर्णोत्कर्षः अनुरागस्य यस्याः कान्ता मनोहरा, रत्नावली हारयष्टिस्तदाख्या कान्ता प्रिया मम हस्तात् भवता भ्रंशिता स्खलनं कारिता एतदेव तव मूर्खत्वमित्यर्थः।

Digitized by Google

वास। अज्जउत्त! कुसुमिदा णोमालिआ?। (१)

राजा। सविस्मयम्। देवि! प्रथममागतैरस्माभिरयं चिरयसीति ज्ञात्वा न दृष्टा, तदेहि, समेतावेव तां पश्यावः।

वास। निर्वर्ण्य। अज्जउत्तमुहाणुरागादो एव्व मए जाणिदं जधा कुसुमिदा णोमालिआत्ति, ता ण गमिस्सं (२)।

विदू। भोदि, जदू एव्वं, ता जिदं अम्हेहिं (३)। इति वासवदत्तां प्रणामार्थं कथयति, कञ्चात् पतितं फलकं दृष्ट्वा विषादं नाटयति।

राजा। अपवार्य अकुण्ठया दर्शयन् वसन्तकसुखं प्रयुङ्क्ते।

विदू। अपवार्य। भो भो, मा कुप्य, अहं ज्जेव्व पच्छादयिस्सं (४)।

वास। फलकं गृहीत्वा भट्टिणि! पेक्ख दाव, किं एत्थ चित्तफलए आलिहिदं? (५)।

वास। निर्वर्ण्य सस्मितम्। अयं अज्जउत्त, इअं उण सागरिआ प्रकाशं राजानं प्रति। अज्जउत्त! किं एदं (६)।

राजा। सहैवोत्थापितं अपवार्य। वयस्य! किं ब्रवीमि?

विदू। अपवार्य। भो मा चिन्तेहि, अहं उत्तरं दाइस्सं। प्रकाशं वासवदत्तां प्रति। भोदि, मा असुधा सम्भावेहि अप्पा

---

(१) आर्यपुत्र! कुसुमिता नवमालिका।

(२) आर्यपुत्रमुखानुरागादेव मया ज्ञातं यथा कुसुमिता नवमालिकेति, न गमिष्यामि।

(३) भवति! यद्येवं, तदा जितमस्माभिः।

(४) भो भो मा कुप्य अहमेव प्रच्छादयिष्यामि।

(५) भर्तः! पश्य तावत्, किमत्र चित्रफलके आलिखितम्?

(६) वा-आर्यपुत्रः, इयं पुनः सागरिका। आर्यपुत्र! किमिदम्?

Digitized by Google

किल दुक्खेण आलिहीअदिसि मम वअणं सुणिअ, पिअव-अस्सेण एदं आलेक्खविण्णाणं दंसिदं (१)।

राजा। यथाह वसन्तकस्तथैवैतत्।

वास। फलकं निर्दिश्य। अज्जउत्त! एसावि जा अवरा तुह समीवे आलिहिता ता किं अज्जवसन्तअस्स विण्णाणं (२)।

राजा। सवलक्षमितम्। अलमन्यथाशङ्कया, दृयं हि स्वचेतसैव परिकल्प्य लिखिता, न तु दृष्टपूर्वा।

विदू। सच्चं सवामि बम्हसुत्तेण, जइ कदापि अम्हेहिं ईदिसी दिट्ठपूर्वा (३)।

वास। अपवार्य। भट्टिणि! कदावि ईदिसं उण घुणक्खरं सम्वदहिज्जेव्व, ता अलं कोवेण (४)।

वास। अपवार्य। अइ उजुए! एदस्स वक्कभणिदाइं ण आणासि, वसन्तओ खु एसो। प्रकाशं राजानं प्रति। अज्जउत्त! मम उण एदं चित्तं पेक्खन्तीए सीसवेअणा समुप्पण्णा, ता सुहं चिट्ठदु अज्जउत्तो, अहं गमिस्सं (५)। इत्युत्थाय गच्छति।

---

(१) भोः! मा चिन्तय, अहमुत्तरं दास्यामि। भवति। मा अन्यथा सम्भावय आत्मा खलु दुःखेनालिख्यते इति मम वचनं श्रुत्वा, प्रियवयस्येन इदं आलेख्यविज्ञानं दर्शितम्।

(२) आर्यपुत्र! एषापि या अपरा तव समीपे आलिखिता, तत् किमार्यवसन्तकस्य विज्ञानम्।

(३) सत्यं शपामि ब्रह्मसूत्रेण, यदि कदापि अस्माभिरीदृशी दृष्टपूर्वा।

(४) भर्त्रि! कदापि ईदृशं पुनर्घुणाक्षरं सम्वदयेत तत्कादृशं कोपेन।

(५) अयि ऋजुके! एतस्य वक्त्रभणितानि न जानासि, वसन्तकः

Digitized by Google

राजा पटान्तेन गृहीत्वा। देवि!

प्रसीदेति ब्रूयामिदमसति कोपे न घटते
करिष्याम्येवं नो पुनरिति भवेदभ्युपगमः।
न मे दोषोऽस्तीति, त्वमिदमपि च स्रास्यसि मृषा
किमेतस्मिन् वक्तुं क्षममिति न वेद्मि प्रियतमे॥ (क)

वास। सविनयं पटान्तमाकर्षन्ती। अज्जउत्त! मा अण्णधा संभावेहि, सच्चं एव्व मं सीसवेअणा बाधेदि, ता गमिस्सं (१)।

इति निष्क्रान्ते।

विदू। भो! दिट्ठिआ वड्ढसे, क्खेमेण अदिक्कन्ता एसा वासवदत्ता, अग्गलवादलिआ (२)।

राजा। धिङ्मूर्ख! अलं परितोषेण, यात्या निगूढो न लक्षितस्त्वया देव्याः कोपानुबन्धः? पश्य

क्षेपः। आर्यपुत्र! मम पुनरिदं चित्तं पद्मावत्याः शीर्षवेदना सन्तप्तया, तस्मात् सुखं तिष्ठ आर्यपुत्रोऽहं गमिष्यामि।

(१) आर्यपुत्र! मा अन्यथा सम्भावय, सत्यमेव मां शीर्षवेदना बाधते, तस्माद्गमिष्यामि।

(२) भो! दिष्ट्या वर्द्धसे क्षेमेणातिक्रान्ता एषा वासवदत्ता, अकाण्डाद्गलिका।

(क) प्रसीदेतीति। त्वं प्रसीद प्रसन्ना भव इति ब्रूयां वक्तुं शक्नुयां किन्त्विदं वचनं कोपे असति सति न घटते न युज्यते, पुनरेकं कार्यमित्यर्थात् न करिष्यामीति चेत्, तदा अभ्युपगमः स्वदोषस्वीकारो भवेत्। मे मम दोषो नास्तीति चेत् इदमपि एतद्वचनमपि त्वं मृषा मिथ्या स्रास्यसि च, न पुनर्विश्वासं करिष्यसीत्यर्थः। हे प्रियतमे! एतस्मिन् विषये किं वक्तुं क्षमं युक्तं भवेदिति नाहं वेद्मीति जानामि।

Digitized by Google

भ्रूभङ्गे सहसोद्गतेऽपि, वदनं नीतं परां नम्रताम्
ईषन्मां प्रति भेदकारि हसितं, नोक्तं वचो निष्ठुरम्।
अन्तर्वाष्पजडीकृतं प्रभुतया चक्षुर्न विस्कारितं,
कोपश्च प्रकटीकृतो दयितया, सुकृत्स्व न प्रत्ययः॥ (क)
तदेहि देवीं प्रसादयितुमभ्यन्तरमेव प्रविशावः।

इति निष्क्रान्तौ।

कदलीगृहं नाम

द्वितीयोऽङ्कः।

(क) भ्रूभङ्ग इति। भ्रूभङ्गे भ्रूकौटिल्ये सहसा उद्गते उदितेऽपि वदनं मुखं परामधिकां नम्रतां नीतं प्रापितं, नतमुखत्वं नीतमित्यर्थः। मां प्रति ईषद्भेदकारि विभिन्नं हसितं हसितमिति भावेक्तः। निष्ठुरं कठिनं वचो नोक्तं। अन्तरभ्यन्तरे वाष्पेण अश्रुजलेन जडीकृतं निश्चलीकृतं स्थिरमित्यर्थः चक्षुः प्रभुतया वाहुल्येन न विस्कारितं विस्तारितं। कोपश्च प्रकटीकृतः प्रकाशितः, प्रत्ययः विश्वासो न सुकृत्स्व, अतः सर्वत्र दयितयेति कर्तृपदेनान्वयः।

Digitized by Google

ततोयोऽङ्कः ।

—००—

ततः प्रविशति मदनिका ।

मद० । आकाशे । कौसम्बिए ! अवि दिट्ठा तुए भट्टिणी-सआसे कञ्चनमाला नवेत्ति । आकर्ण्य । किं भणासि, कोवि कालो ताए आअच्छिअ गदाएत्ति, ता कहिं दाणिं पेक्खिस्सं । अपतोऽवलोक्य । कहं एसा क्खु कञ्चणमाला इदो ज्जेव्व आअच्छदि, ता जाव णं उपसप्पामि (१) ।

ततः प्रविशति काञ्चनमाला ।

काञ्च० । सोच्चासम् । साहु रे वसन्तअ ! साहु, अदिसइदो तुए अमच्चजौअन्धरायणो इमाए सन्धिविग्गहचिन्ताए (२) ।

मद० । सखितत्वपक्ष्य । हला काञ्चणमाले ! किं अज्ज वसन्तएण किदं, जेण सो एव्वं सलाहीअदि (३) ।

---

(१) कौशाम्बिके ! अपि दृष्टा त्वया भर्तुः सकाशे काञ्चनमाला नवेति, किं भणसि, कोऽपि कालस्तया आगत्य गतायेति, तत् कुतोदानीं द्रक्ष्यामि । कथमेषा खलु काञ्चनमाला इत एवागच्छति, तदावदेवाभ्युपसर्पामि ।

(२) साधु रे वसन्तक ! साधु, अतिशयितस्त्वया अमात्ययौगन्धरायणः अनया सन्धिविग्रहचिन्तया ।

(३) सखि काञ्चनमाले । किमद्य वसन्तेन कृतं, येन स एवं श्लाघ्यते ।

Digitized by Google

काञ्च। हला मअणिए! किं तव एदिणा पुच्छिदेण पओअणं, तुमं इमं रहस्सं रक्खिदुं ण पारेसि (१)।

मद। सवामि देवीए चरणेहिं, जइ कज्जवि पुरदो पआसेमि (२)।

काञ्च। जइ एवं ता सुणु, अज्ज खु मए राअकुलादो पडिणिवत्तमाणाए चित्तसालिआदुवारे वसन्तअस्स सुसङ्गदाए समं आलावो सुदो (३)।

मद। सकौतुकम्। सहि! कीदिसो सो आलावो? (४)।

काञ्च। एव्वं वसन्तएण भणिदं जह, सुसङ्गदे, णहि सागरिअं वज्जिअ पिअवअस्सस्स अण्णं किम्पि असुत्थदाए कारणं, ता एत्थ पडिआरं चिन्तेहि (५)।

मद। तदो सुसङ्गदाए किं भणिदं? (६)।

काञ्च। तदो ताए एव्वं भणिदं, अज्ज खु देवीए चित्तफलअवुत्तन्तसङ्किदाए, सागरिअं परिरक्खिदुं मम हत्थे

---

(१) सखि! किं तवैतेन प्रष्टेन प्रयोजनम्, त्वमिदं रहस्यं रक्षितुं न पारयसि।

(२) यदि देव्याश्चरणैः, यदि कस्यापि पुरतः प्रकाशयामि।

(३) यद्येवं, तदा शृणु, अद्य खलु मया राजकुलात् प्रतिनिवर्त्तमानया चित्रशालिकाद्वारे वसन्तकस्य सुसङ्गतया सह अयमालापः श्रुतः।

(४) सखि! कीदृशः स आलापः?

(५) एवं वसन्तकेन भणितम्, यथा, सुसङ्गते! नहि सागरिकां वर्जयित्वा प्रियवयस्यस्यान्यत् किमपि अस्वस्थतायाः कारणम्, तदस्य प्रतीकारं चिन्तय।

(६) तदा सुसङ्गतया किं भणितम्।

Digitized by Google

समप्पअन्तीए, जं णेवत्थं से पसादीकिदं, तेण ज्जेव विरइदभट्टिणीवेसं सागरिअं गेण्हिअ, अहम्मि कञ्चणमालावेसधारिणी भविअ, पदोसे, सआसं भट्टिणो आगमिस्सं? तुमं पि इहट्ठिदो ज्जेव पडिवालइस्ससि, तदो माहवीलदामण्डवे ताए सह भट्टिणो सङ्गमो भविस्सदि (१)।

मद। सुसङ्गदे! इदासा खु तुमं, जा एव्वं परिअणवच्छलां देवीं वञ्चेसि (२)।

कामन्द। हला! दाणिं तुमं कहिं पत्थिदा? (३)।

मद। अम्हसत्थसरीरस्स भट्टिणो कुसलवुत्तन्तं जाणिदुं गदा तुमं चिरयसि त्ति, उत्तम्मन्तीए देवीए तुह सआसं पेसिदम्हि (४)।

कामन्द। अदिउजुआ सा देवी, जा एवं पत्तिआअदि। परिक्रम्यावलोक्य च। कहं एत्थ एसो खु भट्टा अम्हसत्थदामिसेण अत्तणो मअणावत्थं पच्छादअन्तो दन्तोरणवलहीए

---

(१) तदा तयैवं भणितम्, अद्य खलु देव्या चित्रफलकदृत्तान्तशङ्कितया, सागरिकां परिरक्षितुं मम हस्ते समर्पयन्त्या, यत्नेपथ्यं मे प्रसादीकृतम्, तेनैव विरचितभर्तृवेषां सागरिकां गृहीत्वा, अहञ्च काञ्चनमालावेशधारिणी भूत्वा, प्रदोषे सकाशं भर्तुरागमिष्यामि, त्वमपीह स्थिता एवं प्रतिपालयिष्यसि, ततो माधवीलतामण्डपे तया सह भर्तुः समागमो भविष्यति।

(२) सुसङ्गते! कृतार्था खलु त्वं, या एवं परिजनवत्सलां देवीं वञ्चयसि।

(३) सखि! इदानीं त्वं कुत्र प्रस्थिता?

(४) अस्वस्थशरीरस्य भर्तुः कुशलवृत्तान्तं ज्ञातुं गता, त्वं चिरयसीति, उत्तास्यन्त्या देव्या तव समीपं प्रेषितास्मि।

Digitized by Google

उवरि उवविट्टो चिट्ठदि, ता एहि, एदं वुत्तन्तं भट्टिणीए णिवेदेम्ह (१)। इति निष्क्रान्ते प्रवेशकः।

ततः प्रविशति मदनावस्थां नाटयन्नुपविष्टो राजा।

राजा। सोत्कण्ठं निश्वस्य।

सन्तापो हृदय स्मरानलकृतः सम्यत्ययं सह्यताम्
नास्त्येवोपशमोऽस्य तां प्रति पुनः किं त्वं मुधा तास्यसि।
यन्मूढेन मया तदा कथमपि प्राप्तो गृहीत्वा चिरम्
विन्यस्तस्त्वयि सान्द्रचन्दनरसस्पर्शो न तस्याः करः॥ (क)

अहो महदाश्चर्यम्। तथाहि

मनस्वलं प्रकृत्यैव दुर्लक्ष्यञ्च तथापि मे।
कामेनैतत् कथं विद्धं सम सर्व्वैः शिलीमुखैः॥ (ख)

---

(१) अतिऋजुका सा देवी, या एवं प्रत्याय्यते। कथमत्र एष खलु भर्त्ता अवस्थान्तरमिषेण आत्मनो मदनावस्थां प्रच्छादयन् दन्तोत्तरणवद्भ्यामुपविष्टस्तिष्ठति, तदादेहि अस्य वृत्तान्तं भर्त्रे निवेदयामः।

(क) सन्ताप इति। हे हृदय! स्मरएवानलस्तेनकृतो जनितोऽयं सन्तापो वेदना सम्यति सह्यतां, उपायान्तराभावादित्यर्थः। अस्य सन्तापस्य उपशमो विनाशो नास्त्येव, तां सागरिकां प्रति पुनः किं किमर्थं त्वं मुधा वृथा तास्यसि तापं भजसे, तदपि वृथेत्यर्थः। वृथात्वं दर्शयति, यदिति, यद्यस्मात्तदा सागरिका प्राप्तिकाले मूढेनाज्ञेन मया कथमप्यति कष्टेन प्राप्तो लब्धश्चिरं चिरकालं गृहीत्वा सान्द्रचन्दनरसस्पर्शः, घनमलयजरसतुल्य शीतल इत्यर्थः तस्याः करस्त्वयि हृदये न विन्यस्तः समर्पितः, तेनैव वृथात्वमतस्तद्विरहकाले तवापि तापसहनमुचितमित्यर्थः।

(ख) मन इति। प्रकृत्या स्वभावेनैव मनस्वलं चञ्चलं रजोगुणाधिक्यात्तत्वं मनस इति सांख्यनयः। तथापि चञ्चलत्वेऽपि मे मम

Digitized by Google

जहर्षमवलोक्य। भोः कुसुमधन्वन्!

वाणाः पञ्च मनोभवस्य नियतास्तेषामसंख्यो जनः
प्रायोऽस्मद्विध एव लक्ष्य इति यल्लोके प्रसिद्धिं गतम्।
दृष्टं तत्त्वयि विप्रतीपमधुना यस्मादसंख्यैरयम्
विद्धः कामिजनः शरैरशरणो नीतस्त्वया पञ्चताम्॥ (क)

विचिन्त्य। तथाहमेवंविधावस्थमात्मानं नानुचिन्तयामि, यथा-ऽलंगूढ़कोपसम्भाराया देव्या लोचनगोचरगतां तामेव तपस्विनीं सागरिकाम्। तथाहि,

ह्रिया सर्वस्याग्रे नयति विदिताक्षीति वदनम्
द्वयोर्दृष्टालापं कलयति कथामात्मविषयाम्।
सखीषु स्मेरासु प्रकटयति वैलक्ष्यमधिकम्
प्रिया प्रायेणास्ते हृदयनिहितातङ्कविधुरा॥ (ख)

दुर्लक्ष्यं अन्यैर्लक्षयितुमशक्यमिति यावत्। एतत् मनः सर्वैः पञ्चभिः शिलीमुखैर्बाणैः समं सह कथं केन प्रकारेण विद्धं तत्त्ववेद्मीति भावः।

(क) वाणा इति। मनोभवस्य मनसिजस्य कामस्य वाणाः शराः पञ्च पञ्चसंख्यकाः कामस्य पञ्चशरत्वादिति भावः। नियता निश्चिताः, अस्माकं यादृश एव विधा यस्य स अस्मत्सदृशः असंख्यः संख्याराहितोजनः प्रायो बाहुल्येन तेषां शराणां लक्ष्यः इति यल्लोके जगति प्रसिद्धिं गतं प्रसिद्धमस्तीति यावत्। तदधुना त्वयि पञ्चशरे इत्यर्थः विप्रतीपं विरुद्धं दृष्टं, यस्मात् त्वया असंख्यैः संख्याशून्यैः शरैरशरणोऽरक्षणीयोऽयं कामि जनः विद्धः सन् पञ्चतां पञ्चसंख्यतां तथा पञ्चतां जीवितावस्थानं नीतं, एतदेव ते विरुद्धाचरणं तेन विरोधाभासोऽलङ्कारः, असङ्ख्यैः पञ्चतामिति विरोधः तत्परिहारस्तु पञ्चतां मृत्युमिति।

(ख) ह्रियेति। विदिता परैर्ज्ञाताक्षीति हेतोर्ह्रिया लज्जया सर्वस्याग्रे पुरतो वदनं नयति लज्जावनतं मुखं करोतीत्यर्थः। द्वयोरुभ-

प्रेषितश्च मया तद्वार्त्तान्वेषणाय कथं चिरयति वसन्तकः।

ततः प्रविशति हृष्टो वसन्तकः।

वस। सपरितोषम्। हो हो भोः! कोसम्बीरज्जलाहेणावि ण तादिसो पिअवअस्सस्स हिअअपरितोसो आसीत्, जादिसो मम सआसादो अज्ज पिअवअणं सुणिअ हविस्सदि त्ति तक्केमि, ता जाव गदुअ पिअवअस्सस्स णिवेदइस्सं परिक्रम्यावलोक्य च। कथं, एसो पिअवअस्सो जह इमं जेव्व दिसं अवलोअन्तो चिट्ठदि, तह तक्केमि मं जेव्व पडिवालेदि, ता जाव णं उपसप्पामि। इत्युपसृत्य। जअदु जअदु पिअवअस्सो। भो वअस्स! दिट्ठिआ वड्ढसे तुमं समीहिदकज्जसिद्धीए (१)।

---

(१) कौशाम्बीराज्यलाभेनापि न तादृशः प्रियवयस्यस्य हृदयपरितोष आसीत्, यादृशो मम सकाशादद्य प्रियवचनं श्रुत्वा भविष्यतीति, तद्यावद्गत्वा प्रियवयस्यस्य निवेदयामि, कथमेष प्रियवयस्यो यथा इमामेव दिशमवलोकयंस्तिष्ठति, तथा तर्कयामि मामेव प्रतिपालयति, तद्यावदेनमुपसर्पामि। जयतु जयतु प्रियवयस्यः। भो वयस्य! दिष्ट्या वर्द्धसे त्वं समीहितकार्यसिद्ध्या।

कौशाम्बीराज्यलाभं परस्परं विसदृशवाक्यं दृष्ट्वा आत्मविषयां स्वसंक्रान्तां कथां जानयति, एतौ मत्सम्बद्धाविति मनसि विवेचयतीत्यर्थः। सखीषु वयस्यासु कोपेषु स्थितसुखीषु सतीषु अधिकं वैलक्ष्यं लज्जां प्रकटयति, प्रकाशयति, अनेनैव कारणेन मम प्रिया सागरिका प्रायेण भूत्वा हृदय निहितेन हृदिस्थेन आतङ्केन भयेन विधुरा व्याकुला आसीत् सर्वथा लज्जया आधिव्याधि मनु भवतीत्यर्थः।

Digitized by Google

राजा सहर्षम्। वयस्य! अपि कुशलं प्रियायाः सागरिकायाः।

विदू। सगर्वम्। भो! अइरेण सअं एव्व पेक्खिअ जाणिस्ससि (१)।

राजा। सपरितोषम्। वयस्य! दर्शनमपि भविष्यति प्रियायाः?

विदू। साहङ्कारम्। भोः! कीस ण भविस्सदि, जस्स दे उवहसिदबिहप्पदिबुद्धिविहवो अहं अमच्चो (२)।

राजा। विहस्य। न खलु चित्रम्, किं न सम्भाव्यते त्वयि? तत्कथय, विस्तरतः श्रोतुमिच्छामि।

विदू। कर्णौ एवमेवं कथयति।

राजा। सपरितोषम्। वयस्य! इदं ते पारितोषिकम्। इति स्वाङ्गादवतार्य कटकं ददाति।

विदू। कटकं परिधाय आत्मानं निर्वर्ण्य सपरितोषम्। भोदु एव्वं दाव, समुद्दसुद्दसोवसकङ्कमण्डिअहत्थं अत्तणो बम्हणीए गदुअ दंसइस्सं (३)।

राजा। सखे! पश्चाद्दर्शयिष्यसि, श्रूयतां तावत् किमवशिष्टमङ्ग इति।

विदू। परिक्रम्यावलोक्य च सहर्षम्। भोः! पेक्ख पेक्ख, एसो

---

(१) भो, अचिरेण स्वयमेव प्रेक्ष्य ज्ञास्यसि।

(२) भोः! कथं न भविष्यति, यस्य ते उपहसितदुष्कृतिबुद्धिविभवो ऽकृतमात्यः।

(३) भवित्वत्यं तावत्, समुद्रशुद्धसौवर्णकटकमण्डितहस्तं आत्मनो ब्राह्मण्यै गत्वा दर्शयिष्यामि।

Digitized by Google

अहो गुरुरागानुरञ्जितहृदयो, सन्ध्याबन्धुरदक्षिणसङ्केतो विश्व-
स्यैकगिरिशिखरकाननमनुसरति भगवान् सहस्ररश्मिः (१)।

राजा। विलोक्य सहर्षम्। सखे! सम्यगुपलक्षितम्, पर्य्यव-
सितमहः। तथाहि

अध्वानं नैकचक्रः प्रभवति भुवनभ्रान्तिदीर्घं विलङ्घ्य
प्रातः प्राप्तुं रथो मे पुनरिति मनसि न्यस्तचिन्तातिभारः।
सन्ध्याक्रष्टावशिष्टस्वकरपरिकरैः स्पष्टहेमारपङ्क्ति-
व्याक्षेपावस्थितोऽस्ताचलभृति नयतीवैष दिक्चक्रमर्कः (क)

अपिच

यातोऽस्मि पद्मवदने समयो ममेष
सुप्ता मयैव भवती प्रतिबोधनीया।

---

(१) भोः! पश्य पश्य, एष खलु गुरुकानुरागरञ्जितहृदयः, सन्ध्याबन्धु-
दत्तसङ्केत इवास्तगिरिशिखरकाननमनुसरति भगवान् सहस्ररश्मिः।

(क) अध्वानमिति। एकं चक्रं यस्यासौ एकचक्रो मे मम
रथः, सूर्यरथस्य एकचक्रत्वं प्रसिद्धं। भुवनभ्रान्त्या विश्वभ्रमणेन
दीर्घमति महालमध्वानं पन्थानं विलङ्घ्य अतिक्रम्य पुनरपि प्रातः प्रातः
काले प्राप्तुं निर्दिष्टस्थानं मन्तुं न प्रभवति पूर्वरात्रौ बहुपथगमनात् पुनः
प्रातर्गन्तुमशक्तत्वमित्यर्थः। इति हेतोर्मनसि अन्तःकरणे न्यस्तः अर्पित-
श्चिन्ताया अतिभारः आतिशय्यं येन स अस्तचिन्तितभृति अस्ताचले व्य-
वस्थितोऽस्ताचलमवलम्बमान एष परिदृश्यमानोऽर्कः सूर्यः सन्ध्यया आ-
क्रष्टेभ्यः किरणेभ्योऽवशिष्टानां स्वकराणां स्वमयूखानां परिकरैः समूहैः
स्पष्टा उन्नमिता तत्तुल्येत्यर्थः। हेमारपङ्क्तिर्हेमवत् प्रतीयमाना
चरपङ्क्तिररपुञ्जराजिर्यस्य तत् दिक्चक्रं व्याक्षेपम् गृहीत्वा नयतीवे-
त्युत्प्रेक्षा।

Digitized by Google

प्रत्यायनामयमितीव सरोरुहिण्याः
सूर्योऽस्तमस्तकनिविष्टकरः करोति ॥ (क)

तदुत्तिष्ठ तत्रैव माधवीलतामण्डपे गत्वा, प्रियतमासङ्केतावसरं प्रतिपालयावः।

विदू। सोभणं भणिदं। अत्थुत्तिष्ठति।

विदू। विलोक्य। भो वअस्स! पेक्ख पेक्ख, एसो खु बहलीकिदविरलवणराइसण्णिवेसो, गहीदघणपङ्कवीवरवणवराहमहिसकसणच्छवी, पसरदि पुव्वदिसं पच्छादअन्तो तिमिरसंघाओ (१)।

राजा। सहर्षं समन्ताल्लोक्य। वयस्य! सम्यक् दृष्टम्। तथाहि

पुरः पूर्व्वामिव स्थगयति ततोऽन्यामपि दिशम्
क्रमात् क्रामन्नद्रिद्रुमपुरविभागांस्तिरयति।

(१) भोः! पश्य पश्य, एष खलु बहलीकृतविरलवनराजिसन्निवेशो गृहीतघनपङ्कपीवरवनवराहमहिषकृष्णसारच्छविः प्रसरति पूर्वदिशं प्रच्छादयंस्तिमिरसंघातः।

(क) यात इति। पद्ममिव वदनं यस्यास्तत्सम्बुद्धिः। हे पद्मवदने अस्मिन्! अहं यातोऽस्त गन्तुमुद्युक्तो भवामीत्यर्थः। यतः एष मम समयो गन्तुमित्यर्थात्। विधातुर्निर्बोमत्तस्तत्र कथङ्कारमलावस्थानं मम सम्भवतीति भावः। छन्ना छादिता निद्रिता च भवती सर्वैव नान्येन प्रतिबोधनीया, निद्राभङ्गः कार्य्यः, अहमद्य तु यामि कृत्यवशे वा गमिष्यामि तत्र तु तवापि न निद्राभङ्गो भविष्यतीति च ध्वन्यते। अस्त मस्तके अस्ताचलचूड़ायां निविष्टाः करा: किरणा-हस्तौ च यस्य सोऽयं सूर्य्य इतीव इत्थमेव सरोरुहिण्याः पद्मिन्याः स्वप्रेयस्याश्च प्रत्यायनामाश्वासं करोति जनयति। अत्र श्लेषोपमेतूत्थे-क्षाचां सङ्करः।

Digitized by Google

उपैतः पीनत्वं तदनु भुवनस्येक्षणपथम्
तमःसङ्घातोऽयं हरति हरकण्ठद्युतिहरः॥ (क)

तदादेश्य मार्गम्।

विदू। एदु एदु पिअवअस्सो। इति परिक्रामतः।

विदू। निरूप्य। भो वयस्स! एदं क्खु समासण्णं बहलपादवदाए पिण्डीकदन्धआरं विअ मअरन्दुज्जाणं, ता कधं एत्थ मग्गो लक्खीअदि (१)।

राजा। गन्धमाघ्राय। वयस्य! गच्छाग्रतः, ननु सुपरिज्ञात एवात्र मार्गः तथाहि

आलीयं चम्पकानां नियतमयमसौ सुन्दरः सिन्धुवारः
सान्द्रा वीथी तथेयं बकुलविटपिनां पाटला पङ्क्तिरेषा।
आघ्रायाघ्राय गन्धं विविधमधिगतैः पादपैरेवमस्मिन्

---

(१) एत एतु प्रियवयस्यः। भो वयस्य! इदं समासन्नबहुलपादपतया पिण्डीकृतान्धकारमिव मकरन्दोद्यानम्, तत्कथमत्र मार्गो लक्ष्यते।

(क) पुर इति। पुरः प्रथमं पूर्वामेव दिशं स्थगयति व्याप्नोति, ततश्चौचित्यादिति। ततोऽन्यां उत्तरदक्षिणादिकामपि दिशं स्थगयति क्रमात् क्रामन् अपेक्षरो भूत्वा अद्रि द्रुमपुरविभागान् स्थिरयति आच्छादयतीत्यर्थः। तदनु तदनन्तरं पीनत्वं स्थौल्यं गाढतामित्यर्थः। उपैतः प्राप्तः अयं हरकण्ठस्य नीलकण्ठकण्ठस्य द्युतिं कान्तिं हरतीति हरः पचाद्यच् तद्वद्गाढनील इत्यर्थसमः सङ्घातस्तमोऽन्धं भुवनस्य जगतः अथवा महर्सिमालवसमूहस्य ईक्षापथं नयनगोचरं हरति अतः कस्य तमसो गिरिगुहाद्यनेकविध पदार्थाच्छादनात् तत्सुम्बन्धोक्तेरविषयोक्तिः, साधोपमया संकीर्यते।

Digitized by Google

अस्मिं पन्थाः प्रयाति द्विगुणतरतमोनिष्कुतोऽप्येष चिह्नैः (क इति परिक्रामतः।

विदू। भो! एदं खु निपडन्त-मत्तमहुअर-वउलकुसुमामोदवासिदद्दसदिसामुहं मसिणमरगअमणिसिलाकुट्टिमसुहाअन्तचरणसञ्चारसूइदं, तं ज्जेव माहवीलदामण्डवं संपत्तम्ह, ता इह ज्जेव चिट्ठदु भवं, आवदहं देवीवेसधारिणीं सारिअं गेण्हिअ, लहु आअच्छामि (१)।

राजा। वयस्य! तेन हि त्वर्यताम्।

विदू। वअस्स! मा उत्तस्स, एसो आअदोम्हि (२)। इति निष्क्रान्तः।

---

(१) भो! इदं खलु निपतन्मत्त-मधुकरवकुलकुसुमामोद-वासित-दशदिग्मुखं मसृण-मरकतमणिशिला कुट्टिम-सुखाअमान-चरणसञ्चार-सूचितं, तमेव माधवीलतामण्डपं सम्प्राप्ताः स्मः, तत्रादिष्टैव तिष्ठतु भवान्, यावदहं देवीवेषधारिणीं सारिकां गृहीत्वा, लघु आगच्छामि।

(२) वयस्य! मा उत्तस्थः, एष आगतोऽस्मि।

(क) पाठीति। इयं नियतं लिखितं चक्रवाकानां पाठी श्रेणी। अवनतौ इयमाना इत्यर्थः सुन्दरः सिन्धुवारः तस्य वक्रकविटपिनां वक्रद्रुमाणामिवं सान्द्रा निविड़ा वीथी राजिः एषा पाटला पंक्तिः पाटलाटवश्च श्रेणी। अस्मिन् अस्मितैर्मृदितैः पादपैरिक्षुभिर्विविधं जन्यं आयायायाव आभीरोष्ट्र द्विरुक्तिः। द्विगुणतरमिति क्रियाविशेषणं त्रयोविंशेषणं वा तत्र द्विगुणतरैस्त्रयोभिर्निष्कुत इत्यवयवभेदः, एष पन्था अस्मिं स्फुटतां प्रयाति चक्रवाद्यनेकविधचिह्नैः स्पष्टं पन्था अनुभवीयत इत्यर्थः। अतापक्रवानुमानयोः सजातीय स्फुरः।

Digitized by Google

राजा। तावदहमप्यस्यां मरकतशिलावेदिकायामुपविश्य, प्रियायाः सङ्केतसमयं प्रतिपालयामि। उपविश्य सचिन्तम्। अहो! कोऽपि कामिजनस्य स्वगृहिणीसमागमपरिभाविनोऽभिनवजनं प्रति पक्षपातः। तथाहि

प्रणयविशदां दृष्टिं वक्त्रे ददाति न शङ्किता
घटयति घनं कण्ठाश्लेषे रसान्न पयोधरौ।
वदति बहुशो गच्छामीति प्रयत्नधृताप्यहो
रमयतितरां सङ्केतस्था तथापि हि कामिनी॥ (क)

अये! कथञ्चिरयति वसन्तकः, तत् किं नु खलु विदितः स्यादयं वृत्तान्तो देव्या वासवदत्तया।

ततः प्रविशति वासवदत्ता काञ्चनमाला च।

वास०। हञ्जे कञ्चनमाले! सच्चं एव्व मह वेसधारिणी भविअ, सागरिआ अज्जउत्तं अहिसरिस्सदित्ति? (१)।

काञ्च०। कधं अण्णधा भट्टिणीए निवेदीअदि? अहवा चित्तसालिआदुवारे उवविट्ठो वसन्तओ ज्जेव्व दे पच्चअं उप्पादइस्सदि (२)।

---

(१) हञ्जे काञ्चनमाले! सत्यमेव मम वेशधारिणी भूत्वा सागरिका आर्यपुत्रमभिसरिष्यतीति?

(२) कथमन्यथा भर्त्रे निवेद्यते? अथवा चित्रशालिकाद्वारे उपविष्टो वसन्तक एव ते प्रत्ययमुत्पादयिष्यति।

(क) प्रणयेति। शङ्किता सती प्रणयेन प्रेम्णा विशदां शुभ्रां अनुरक्तां दृष्टिं वक्त्रे मुखे न ददाति नार्पयति, रसादनुरागात् रतं विधाय श्रमवशेन पसूमी। घनं निविडं यथा भवति तथा कण्ठाश्लेषे कण्ठालिङ्गने सति पयोधरौ कुचौ न घटयति न योजयति। प्रयत्नधृताऽपि

वास। तेण हि तदो तहिं जेव्व गच्छम्ह (१)

काञ्च। एदु एदु भट्टिणी (२)। इति क्रामतः।

ततः प्रविशति छतावगुण्ठनो वसन्तकः।

विदू। कथं दत्ता। जह अअं चित्तसालिआदुवारे पदसद्दो सुणीअदि, तह तक्केमि आअदा सामरिआत्ति (३)।

काञ्च। भट्टिणि! इअं सा चित्तसालिआ, ता इध जेव्व चिट्ठ, अहं पि वसन्तअस्स संखं देमि (४)। इति क्षोटिकां ददाति।

विदू। सहर्षं उपसृत्य शङ्कितम्। सुसङ्गदे! सरिसो क्खु तुए किदो कञ्चणमालाए वेसो, अध सामरिआ दाणिं कहिं (५)

काञ्च। अङ्गुल्या दर्शयन्ती। णं एसा (६)।

विदू। हहा। विडम्बितम्। एसा फुडं जेव्व देवी वासवदत्ता? (७)।

---

(१) तदा तत्रैव गच्छामः।

(२) एतु एतु भर्त्री।

(३) यथा अयं चित्रशालिकाद्वारे पदशब्दः श्रूयते, तथा तर्कयामि आगता सामरिकेति।

(४) भर्त्रि! इयं सा चित्रशालिका, तस्मादिहैव तिष्ठ, अहमपि वसन्तकस्य शंखं ददामि।

(५) सुसङ्गते! सदृशः खलु त्वया कृतः काञ्चनमालाया वेषः, अथ सामरिका इदानीं कुत्र?

(६) ननु एषा।

(७) एषा स्फुटमेव देवी वासवदत्ता।

ष्टहीतापि अहं गच्छामीति वक्तुयो वारंवारं वदति तथापि कामिनी संकेतस्था कृतसङ्केता इति ज्ञात्वा रमयतितरामतिशयेन प्रमोदयति।

Digitized by Google

दास। सखम्! अनयवार्त्ता। कहं पच्चभिज्ञादाम्मि एदेण तं अभिस्सम (१)।

विदू। भोदि सागरिए! इदो आअच्छ (२)।

दास। विदूषकस्य कार्यमनालक्षयन्नवलोकयति।

राजा। भट्टिणि! एव्वं। अपवार्य्य विदूषकं कर्णे कृत्वा तर्जयन्ती। हदास! सुमरिस्ससि एदं ववणं (३)।

विदू। तुवरदु तुवरदु सागरिआ एसो क्खु पुव्वदिसादो उग्गच्छदि भअवं मिअलच्छणो (४)!

दास। सखम्! अनयवार्त्ता। भअवं मिअलच्छण अमो दे मुहुत्तअं दाव ओवारिदसरीरो होहि, जेण पेक्खामि से भावाणु वन्धं (५)। इति परिक्रामति।

राजा। सोत्कण्ठम्, आत्मगतम्। उपस्थितप्रियासमागमस्यापि किमिदमत्यर्थमुत्कण्ठ्यति मे मनः। अथवा

तीव्रः स्मरसन्तापो न तथादौ बाधते यथासन्ने।
तपति प्रावृषि नितरामभ्यर्णजलागमो दिवसः (क)

---

(१) कार्यमनालक्षे! कथं प्रत्यभिज्ञातास्मि एतेन तन्नाभिष्यामि।

(२) भवति सागरिके! इत आगच्छ।

(३) भर्त्तः! एवमिदम्। कृतघ्ने! स्मरिष्यसीदं वचनम्।

(४) त्वरतां त्वरतां सागरिका, एष खलु पूर्वदिश उद्गच्छति भगवान् मृगलाञ्छनः।

(५) भगवन् मृगलाञ्छन! नमस्ते मुहूर्त्तं तावदपवारितशरीरो भव येन प्रेक्षाम्यस्य भावानुबन्धम्।

(क) तीव्र इति। तीव्रो दुःसहः स्मरसन्तापः कामजनितव्यथा आसन्ने प्रियसमागमस्य समीपवर्त्तीकाले यथा बाधते पीड़यति तथा आदौ प्रथम-

Digitized by Google

विदू। आमन्त्रय। भोदि सागरिए! एसो क्खु पिअवअस्सो सुअंजेव उद्दिसिअ उक्कण्ठाणिब्भरं मन्तेदि, ता णिवेदेहि से तुहागमणम् (१)

दास। शिरसावधार्यति।

विदू। राजानमवलोक्य। भो वअस्स! दिट्ठिआ वड्ढसे, एसा क्खु मए आणीदा सागरिआ (२)।

राजा। सहर्षं सहसोत्थाय। क्वासौ क्वासौ।

विदू। णं एसा (३)।

राजा। उपसृत्य। प्रिये सागरिके!

प्रीतांशुखमुत्पले तव दृशौ पद्मानुकारौ करौ
रम्भागर्भनिभं तवोरुयुगलं बाहू मृणालोपमौ।
इत्याह्लादकरासिलाङ्गि! रभसान्नि:शङ्कमालिङ्ग मां
अङ्गानि त्वमनङ्गतापविधुराण्येवं हि निर्वापय (क)

(१) भवति! सागरिके! एष खलु प्रियवयस्यस्त्वामेवोद्दिश्य उत्कण्ठानिर्भरं मन्त्रयति, तन्निवेदयामि तव तवागमनम्।

(२) भो वयस्य! दिष्ट्या वर्धसे, एषा खलु मया आनीता सागरिका।

(३) नन्वेषा।

ग्रीष्मागमकाले नवोदक इति। प्रावृषि वर्षासु अभ्यर्णो निकटवर्त्ती जलागमो वृष्टिर्यत्र स दिवसः नितरां तपति सातिशयं व्यथयति जलान्विति-क्षेपः। वर्षाकाले जलभरितमेघपूर्णदिवसस्य तापजनकत्वात्तापजनकत्वा-क्षेप इति भाव इति दृष्टान्तालङ्कारः स्फुट एव।

(क) प्रीतांशुरिति। तव मुखं प्रीतांशुसदृशत्वेन परिप्लवनिमित्यर्थः। दृशौ दृष्टी उत्पले पद्मे, करौ पद्मानुकारौ पद्मसदृशौ। तव उरु-युगलं उरुद्वयं रम्भायाः कदल्या गर्भनिभं तत्सदृशं बाहू भुजलतौ मृणालवत् सुन्दरौ कोमलौ शुभ्रौ च इति हेतोः हे आह्लाद-

Digitized by Google

वास। सवाञ्जलिमपवार्य। कञ्चणमाले! एवं सयं मन्तेदि अज्जउत्तो, पुणोवि, कहं मं आलविस्सदित्ति, अहो अच्छरीअं (१)।

काञ्च। अपवार्य। भट्टिणि! एवं सोदं किं उण अवरं साहसिआणं पुरिसाणं ण सम्भावीअदि (२)।

वास। भोदि सागरिए! वीसद्धा भविअ, पिअवअस्सं आलावेहि, अज्जंबि दाव सो णिच्चरट्ठाए देवीए वासवदत्ताए दुव्वअणेहिं कडुइदाइं सोत्ताइं, सम्मदं सुहावेदु तुह मधुरवअणोवण्णासो (३)।

वास। सरोषमपवार्य। हञ्जे कञ्चणमाले! अहं ईदिसी कडुअभासिणी, अज्जवसन्तओ उण पिअंवदो (४)।

---

(१) काञ्चनमाले! एवं स्वयं मन्त्रयति आर्यपुत्रः, पुनरपि कथं मां आलपिष्यतीति, अहो आश्चर्यम्।

(२) भर्त्रि! एवमिदं, किं पुनरपरं साहसिकानां पुरुषाणां न सम्भाव्यते।

(३) भवति सागरिके! विश्रब्धा भूत्वा, प्रियवयस्यमालप, अद्यापि तावदस्याः नित्यरुष्टाया देव्या वासवदत्ताया दुर्वचनैः कटुकृतानि श्रोत्राणि, साम्प्रतं सुखयतु तव मधुरवचनोपन्यासः।

(४) हञ्जे काञ्चनमाले! अहमीदृशी कटुभाषिणी आर्यवसन्तकः पुनः प्रियम्वदः।

कराञ्जलाङ्क! आह्लादजनिकदेहे! रभसाद्गत्वा निःशङ्कं यथा तथा मामालिङ्ग्य आश्लिष्य अनङ्गसन्तापविधुराणि कामसन्तापदूनानि अङ्गानि समेत्यर्थात् त्वं एह्येहि सत्वरमागच्छ अभीक्ष्णं हिमैः। निर्वापय प्रशमय शीतलीकुरु। अन्यथा जीवनधारणमतीवदुष्करमित्यर्थः। अत्र निश्चयान्सन्देहालङ्कारः॥

Digitized by Google

काञ्चि। अपवार्य अङ्गुल्या तर्जयन्ती। हदास! सुमरिस्ससि एदंवअणम् (१)

विदू। विलोक्य। भो वअस्स! पेक्ख पेक्ख, एसो क्खु कुविदकामिणीकवोलसप्पहो सव्वं पआसअन्तो, उदिदो भअवं मिअलञ्छणो (२)

राजा। निरूप्य सखेदम्। प्रिये! पश्य पश्य,

आरूढश्च शैलशिखरं त्वद्वदनापहृतकान्तिसर्वस्वः।
प्रतिकर्तुमिवोद्यतकरः स्थितः पुरस्तान्निशानाथः (क)

अपिच। ननु प्रिये! किमत्र दर्पितमनेनोद्गूढता जडत्वम्? कुतः?

किं पद्मस्य रुचिं न हन्ति नयनानन्दं विधत्ते न किम्
द्वेष्टिं वा मकरकेतनस्य कुरुते नालोकमात्रेण किम्
वक्त्रेन्दौ तव सत्यमेष यदपरः शीतांशुरुज्जृम्भते
दर्पः स्यादमृतेन चेदिह तदप्यस्त्येव विम्बाधरे (ख)

---

(१) हृदय! स्मरिष्यसि इदं वचनम्।

(२) भो वयस्य! पश्य पश्य! एष खलु कुपितकामिनीकपोलसप्रभः सर्वं प्रकाशयन्, उदितो भगवान् मृगलाञ्छनः।

(क) आरूढेति। हे प्रिये! तव वदनेनाननेनापहृतं कान्तिरेव सर्वस्वं यस्य सः अतः विस्तारिताः स्वकिरणाः करौ हस्तौ च यस्य तादृशो निशानाथश्चन्द्रः प्रतिकर्तुं प्रतीकारार्थमिवेत्युत्प्रेक्षा। शैलशिखरं गिरिशृङ्गमारुह्य पुरस्तात् स्थितः। यथान्यः कश्चिद्दौरात्म्यकृतसर्वस्वः पर्वतशिखरे प्रतीकारार्थं तपश्चरतीति ध्वन्यते।

(ख) किमिति। तव वक्त्रेन्दुर्मुखशशी किं पद्मस्य कमलस्य रुचिं शोभां न हन्ति अत्र काकुः हन्त्येवेत्यर्थः। तथा नयनानां जन-

Digitized by Google

वास। सरोषमवगुण्ठनपटमपनयति। अज्जउत्त! सच्चं एव्व अहं सागरिआ, तुमं उण सागरिओक्खित्तहिअओ, सव्वं एव्व सागरिआमअं पेक्खसि (१)।

राजा। दृष्ट्वा सवैलक्ष्यम्। हा धिक् कष्टम्, कथं देवी वासवदत्ता! वयस्य! किमेतत्?

विदू। सविषादम्। भो वअस्स! किं अवरं, अम्हाणं जीविदसंसओ जादो एसो (२)

राजा। उपविश्य अञ्जलिं बद्ध्वा। प्रिये वासवदत्ते! प्रसीद प्रसीद!

वास। तदभिमुखमभ्रूणि निपातयन्ती। अज्जउत्त! मा एव्वं भण, अणत्थगदाइं इमाइं अक्खराइं (३)

---

(१) आर्यपुत्र! सत्यमेवाहं सागरिका, त्वं पुनः सागरिकोत्क्षिप्तहृदयः, सर्वं सागरिकामयं पश्यसि।

(२) भो वयस्य! किमपरमस्माकं जीवितसंशयो जात एषः।

(३) आर्यपुत्र! मा एवं भण, अनर्थगतान्येतान्यक्षराणि।

चक्षुषां आनन्दं किं न धत्ते कुरुते अत्रापि काकुः। तथाच आलोकमात्रेण दर्शनमात्रेण च भासोभीनः द्योतनं ध्वजो यस्य तस्य कामस्य किं दृद्धिं न कुरुते अपि तु कुरुतएवेत्यर्थः। चन्द्रत्वन्मुखचन्द्रयोः कामोद्दीपकत्वसाम्यमस्त्येवेति तात्पर्यम्। अतएव तव वक्त्रेन्दौ सति यदयमपरोऽन्यः शीतांशुचन्द्र उज्जृम्भते उदेति तदुष्टमेवेति तात्पर्यम्। तन्मुखस्य चन्द्रस्य च समानकार्यकारित्वेऽपि चन्द्रोदयो विफल एव। ननु चन्द्रस्तु सुधाधारस्तन्मुखचन्द्रस्तु न तथेति वाच्यमिति तथात्वेऽपि साम्यं दर्शयितुमाह दर्प इति चेद्यदि अमृतेन सुधया निर्मितेव दर्पो गर्वः स्यादर्थाच्चन्द्रस्य तदपि दुष्टमेवेति कुत इत्याशयेनाह, इह तव बिम्बाधरे तदमृतमस्तीति एतेन साम्यं दर्शितम्।

Digitized by Google

विदू। आत्मगतम्। किं दाणिं एत्थ करिस्सं, भोदु एवं दाव। प्रकाशम्। भोदि, महानुभावा क्खु तुमं, ता क्खमीअदु दाव एक्को अवराहो पिअवअस्सस्स (१)।

वास। अज्ज वसन्तअ णं, पढमसङ्गमे विग्घं करन्तीए मए ज्जेव्व एदस्स अवरद्धं ण अज्जउत्तेण (२)।

राजा। एवं प्रत्यक्षमेवालोकः किं ब्रवीमि, तथापि विज्ञापयामि।

आताम्रितामपनयामि विलक्ष एष
लाक्षाक्तां चरणयोस्तव देवि! मूर्ध्ना।
कोपोपरागजनितान्तु मुखेन्दुबिम्बे
कर्त्तुं क्षमो यदि परं करुणा मयि स्यात् (क)

इति पादयोः पतति।

वास। हस्तेन वारयन्ती। अज्जउत्त! उट्ठेहि, उट्ठेहि खिलज्जो क्खु सो जणो जो अज्जउत्तस्स ईदिसं हिअअं

---

(१) किमिदानीमत्र करिष्यामि, भवतु एवं तावत्, महानुभावा खलु यूयम्, तत् क्षम्यतां तावदेकोऽपराधः प्रियवयस्यस्य।

(२) आर्य वसन्तक! नन्वु प्रथमसङ्गमे विघ्नं कुर्वन्त्या मयैव कृतस्यापराधं न आर्यपुत्रेण।

(क) आतामेति। हे देवि! विलक्षो लज्जित एषोऽहं तव चरणयोर्लाक्षातामलक्तकरचिता माताम्रतामीषत्ताम्रवर्णत्वं मूर्ध्ना मम मस्तकेनापनयामि, तथा मुखेन्दुबिम्बे कोपोपरागजनितां कोपरूपग्रहजन्यां आताम्रतां तु कर्त्तुं क्षमस्तुभ्यमेनेति भावः। परं किन्तु यदि मयि करुणा स्यात् कृपया नाहं शक्नोमि कर्त्तुमित्यर्थः।

Digitized by Google

आणिअ पुणोवि कुप्पदि, ता सुहं चिट्ठदु अज्जउत्तो, अहं गमिस्सं (१)। इति गच्छति।

वास। भट्टिणि! करेहि पसादं, एव्वं चरणपडिअं महाराअं उज्झिअ, गदाए देवीए अवस्सं पच्छादावेण होदव्वं (२)।

वास। अवेहि, अपण्डिदे! कुदो एत्थ पसादस्स पच्छादावस्स वा कारणं ता गच्छह्म (३)। इति निष्क्रान्ते।

राजा। देवि! प्रसीद प्रसीद।

विदू। भो! उट्ठेहि, गदा सा वासवदत्ता देवी, ता कीस एत्थ अरण्णरुदिदं करेसि (४)।

राजा। सुखसुप्तानीत्थं। कथमसत्येव प्रसादं गता देवी।

विदू। न कदो कह पसादो, जं अज्जवि अक्खदसरीरा चिट्ठह्म (५)।

---

(१) आर्यपुत्र! उत्तिष्ठोत्तिष्ठ, निर्लज्जः, खलु स जनो य आर्यपुत्रस्नेहं हृदयं ज्ञात्वा, पुनरपि कुप्यति, तस्मात् सुखं तिष्ठत्वार्यपुत्रः, अहं गमिष्यामि।

(२) भर्त्रि! कुरुष्व प्रसादं एवं चरणपतितं महाराजमुज्झित्वा गतायां देव्यां अवश्यं पश्चात्तापेन भवितव्यम्।

(३) अपैहि, अपण्डिते! किमत्र प्रसादस्य पश्चात्तापस्य वा कारणम्? तस्मात् गच्छामः।

(४) भो! उत्तिष्ठोत्तिष्ठ, मता सा वासवदत्ता देवी, तत् कथमत्र अरण्यरुदितं करोषि।

(५) न कृतः कथं प्रसादो, यदद्यापि वयमक्षतशरीरास्तिष्ठामः।

Digitized by Google

राजा। धिङ्मूर्ख! किमेतमुपङ्कसि मां, वत्स त्वत्कृत एवायमापतितोऽस्माकमनर्थक्रमः। यतः

समारूढः प्रीतिः प्रणयबहुमानादनुदिनम्
व्यलीकं वीक्ष्येदं कृतमकृतपूर्वं खलु मया।
प्रिया मुञ्चत्यद्य स्फुटमसहना जीवितमसौ।
प्रकृष्टस्य प्रेम्णः स्खलितमविषह्यं हि भवति (क)

विदू। भो! रुट्ठा देवी, दाव ण जाणोअदि किं करिस्सदित्ति, सागरिआ उण जीवदि णवेत्ति (१)।

राजा। वयस्य! अहमप्येवं चिन्तयामि। हा प्रिये सागरिके!

ततः प्रविशति वासवदत्तावेषधारिणी सागरिका।

---

(१) भो! रुष्टा देवी तावत् न ज्ञायते किं करिष्यति, सागरिका पुनर्जीवति नवेति।

(क) समेति। प्रणय बहुमानात् अनुदिनं प्रीतिः समारूढा जाता यतश्च प्रणयाधिक्यं ततश्च प्रीत्यतिशयमिति तात्पर्यार्थः। प्रिया वासवदत्ता अकृतपूर्वं पूर्वं कदापि न कृतं मया कृतमिदं सागरिकाया-मात्मीयत्वरूपं व्यलीकं अकार्यं वीक्ष्य दृष्ट्वा खलु अद्य कालविलम्बमकृत्वैव असहना सोढुमशक्ता सत्यसौ जीवितं प्राणान् मुञ्चति उद्बन्धनादि-व्यापारेण जीवितं त्यजति स्फुटमित्युत्प्रेक्षे। तथाह्यर्थान्तरं न्यस्यति हि यतः प्रकृष्टस्य अतिशयिता प्राप्तस्य प्रेम्णः प्रणयस्य स्खलितं भ्रंशः अविषह्यं सोढुमशक्यं भवतीत्यर्थः। प्रगाढप्रेम्णि नायिकास्तु नायकानामणुमप्यपराधं वीक्ष्य असहसा प्राणत्यागाय यतन्त इति प्रसिद्धमत्रार्थान्तरसंन्यासयोः संकरः।

दासी। भोदीए। दिट्ठिआ इमिणा विरइददेवीवेसेण इमादो सङ्गीदसालादो णिक्कमन्ती केणावि ण लक्खिदम्हि, ता दाणिं किं करिस्सम्? (१)। इति साशङ्कं चिन्तयति।

विदू। भोः! किं मूढो विअ चिट्ठसि, चिन्तेहि एत्थ पडिआरं (२)।

राजा। वयस्य! तदेव चिन्तयामि! देवीप्रसादं मुक्त्वा नाऽन्यमुपायं पश्यामि, तदेहि तत्रैव गच्छावः। इति परिक्रामतः।

दासी। विदूषअ सागदम्। वरं दाणिं सअं ज्जेव अत्ताणअं उव्वन्धिअ उवरदा भविस्सं, ण उण विदिदसङ्केदवुत्तन्ताए सुसङ्गदाए सह देवीए परिभूदा चिट्ठम्हि, ता जाव अहं असोअपादअले गदुअ, जह समीहिदं करिस्सं (३)। इति परिक्रामति।

विदू। आकर्ण्य। चिट्ठउ दाव चिट्ठ, भोः! पदसद्दो सुणीअदि, जाणामि कदापि गहिदपच्छादावा पुणोवि देवी आअदा भवे (४)।

---

(१) दिष्ट्या अनेन विरचितदेवीवेशेन अस्माः सङ्गीतशालया निष्क्रामन्त्या कोऽपि न लक्षितोऽस्मि, तत् किमिदानीं करिष्यामि?।

(२) भोः! किं मूढ इव तिष्ठसि, चिन्तय अत्र प्रतीकारम्।

(३) वरमिदानीं स्वयमेवात्मानमुद्बध्य उपरता भविष्यामि, न पुनर्विदितसङ्केतवृत्तान्तया सुसङ्गतया सह देव्या परिभूता तिष्ठामि तदावद्-कृतमशोकपादपमूले गत्वा, यथासमीहितं करिष्यामि।

(४) तिष्ठ तावत् तिष्ठ, भोः! पदशब्दः श्रूयते, जानामि कदापि गृहीतपश्चात्तापा पुनरपि देवी आगता भवेत्।

Digitized by Google

राज। वयस्य! महानुभावा खलु देवी। कदाचिदेवमपि स्यात्, तत् त्वरितं निरूपय।

विदू। जं भवं आणवेदि (१)। इति विष्क्रामति।

राज। उपसृत्य। ता जाव इमाए माधवीलदाए पासं विरइअ इह एव असोअपादवे अप्पाणअं उव्वन्धिअ, वावादेमि। इति लतापाशं रचयन्ती। हा तात! हा अम्ब! एसा दाणिं अहं अणाधा, असरणा, विवज्जामि मन्दभागिणी (२)। इति कण्ठे लतापाशमर्पयति।

विदू। विलोक्य। का उण एसा, कहं उण वासवदत्ता।

सभयमवलोक्य। भो वअस्स! परित्ताहि परित्ताहि, एसा खलु देवी वासवदत्ता अप्पाणअं उव्वन्धिअ वावादेदि (३)।

राजा। सभ्रममुपसृत्य। वयस्य! क्वासौ क्वासौ।

विदू। णं एसा।

राजा। कण्ठात् पाशमपनयन्। अयि साहसकारिणि! किमिदमकार्य्यं क्रियते?

---

(१) यदुपयान् आज्ञापयति।

(२) तद्यावत् अनया माधवीलतया पाशं विरचय्य इहैव अशोकपादपे आत्मानमुद्बध्य, व्यापादयामि। हा तात! हा मातः! एषा इदानीमहमनाथा अशरणा विपद्ये मन्दभागिनी।

(३) का पुनरेषा, कथं पुनर्देवी वासवदत्ता। भो वयस्य! परित्रायस्व, परित्रायस्व, एषा खलु देवी वासवदत्ता आत्मानमुद्बध्य व्यापादयति।

Digitized by Google

मम कण्ठगताः प्राणाः पाशे कण्ठगते तव।
अतः स्वार्थः प्रयत्नोऽयं त्यज्यतां साहस प्रिये! (क)

सागः। राजानं दृष्ट्वा। अज्जो! कधं एसो भट्टा। सहर्षम्। आलिगदेम्। जं सच्चं एणं पेक्खिअ, पुणोवि मे जीविदाहिलासो सम्वत्तो, अहवा एणं पेक्खिअ, कदत्था भविअ, सुहेण अप्पाणं उव्वहिअ जीविदं परिच्चइस्सम्। प्रकाशम्। मुञ्चदु मुञ्चदु मं भट्टा, पराहीणो क्खु अअं जणो ण उण ईदिसं अवसरं मरिदुं पावेदि, तुमंपि देवीए मा अप्पाणं अवराहिणं करेसि (१)। इति पुनः कण्ठे पाशं दातुमिच्छति।

राजा। निरूप्य सहर्षम्। कथं प्रिया मे सागरिका।

इति कण्ठात् पाशमाच्छिद्य।

अलमलमतिमात्रं साहसेनानुना ते
त्वरितमयि विमुञ्च त्वं लतापाशमेनम्।

---

(१) आर्य्यम्, कथमेष भर्ता, यत्तत्त्वमेनं दृष्ट्वा पुनरपि मे जीविताभिलाषः संवृत्तः, अथवा एनं दृष्ट्वा, कृतार्था भूत्वा, सुखेन आत्मानं परित्यजामि। मुञ्चतु मुञ्चतु मां भर्त्ता, पराधीनः खल्वयं जनो न पुनरीदृशं अवसरं मर्त्तुं प्राप्नोति, त्वमपि देव्या मा आत्मानं अपराधिनं करोषि।

(क) अमेति। पाशे यज्ञनरज्ज्वौ तव कण्ठगते सति मम प्राणाः कण्ठगता भवन्ति, त्वयि मृतायामहमपि मृतः स्यामित्यर्थः। अतो ह्येतोरयं प्रयत्नः स्वदीयप्राणरक्षाविषयः स मम स्वार्थः स्वीय प्रयोजनसाधनरूपः। त्वयि मरणाद्रक्षितायां अहमपि रक्षितो भवेयमित्यर्थः। तेन हे प्रिये! इति कातर सम्बोधन साहस प्राणपरित्यागोद्यमरूपं लज्जितं एतदनौचित्यं तवेत्यर्थः। अत्राद्ये पादेऽनुज्ञातिरलङ्कारः यदुक्तं "दर्पणजाता कार्यकारणयोर्भिन्नदेशतायामनुज्ञातिरिति लक्षणात्"।

Digitized by Google

चलितमपि निरोद्धुं जीवितं जीवितेशे !
क्षणमिह मम कण्ठे बाहुपाशं निधेहि ॥ (क)

इति बाहुपाशमालिख्य कण्ठे ददाति । विदूषकं प्रति । सखे !
दृश्यमनस्का दृष्टिः ।

विदू । भो ! एवं खु इदं, जइ अकालवादावली भविअ
ण आआदि देवी वासवदत्ता (१) ।

ततः प्रविशति वासवदत्ता काञ्चनमाला च ।

वास । हञ्जे कञ्चणमाले ! तहा चरणणिवडिदं अज्ज-
उत्तं अवधीरिअ आअच्छन्तीए मए अदिणिट्ठुरं किदं, ता
दाणिं सअं एव्व गदुअ अज्जउत्तं अणुणइस्सं (२) ।

---

(१) भो ! एवमिदं, यदि अकालवातावली भूत्वा, न आयाति देवी वासवदत्ता ।

(२) हञ्जे काञ्चनमाले ! तथा चरणनिपतितं आर्यपुत्रमवधीर्य आगच्छन्त्या मया अतिनिष्ठुरं कृतं, तदिदानीं स्वयमेव गत्वा आर्यपुत्रमनुनेष्यामि ।

(क) अलमिति । अतिमात्रं यथा भवति तथा ते तव अहना एतन्मनव्यापारहेतुना साहसेनालमलमिति सम्भ्रमे द्विर्भावः अलं योगेन तृतीया । अयि सागरिके ! त्वं त्वरितं झटिति एनं लता-पाशं विसृज परित्यज हे जीवितेशे ! प्राणेश्वरि ! चलितं देहं विहाय निर्गतमपि जीवितं ममेत्यर्थात् निरोद्धुरक्षितं क्षणमिह मम कण्ठे बाहुपाशं निधेहि अर्पय आलिङ्गनदानेन गमनप्रवणं मदीयजीवितं रक्षेत्यर्थः ।

Digitized by Google

काञ्च। को अण्णो देवीं वञ्चिअ एवं भणिदुं जाणादि, वरं सो एव्व देवो दुज्जणो होदु, ण उण देवी, ता एदु एदु देवी (१)। इति परिक्रामतः।

राजा। अयि सुग्धे! किमद्यापि वयं विफलमनोरथाः क्रियामहे।

काञ्च। भट्टिणि! जह समीवे भट्टा मन्तेदि, तह तक्केमि, तुमं ज्जेव्व अणुणेदुं आअच्छदि, ता उवसप्पदु भट्टिणी (२)।

वास। सहर्षम्। ता अलक्खिता एव्व पुट्ठदो गदुअ कण्ठे गेण्हिअ, पसादइस्सं (३)।

विदू। भोदि सागरिए! वीसत्था भविअ, पिअवअस्सं आलावेहि (४)।

वास। कर्णौ दत्वा सकोपम्। कञ्चणमाले! सागरिआवि एत्थ एव्व चिट्ठदि, ता सुणह, दाव जाणिअ, पच्छा उपसप्पिस्सं (५)। इति तथा स्थिते।

राग। भट्टा! किं एदिना अलीअहक्खिसेण, जीवि-

---

(१) कोऽन्यो देवीं वञ्चयित्वा एवं भणितुं जानाति, वरं स एव देवो दुर्जनो भवतु, मैं पुनर्देवी, तत् एतु एतु देवी।

(२) भर्त्रि! यथा समीपे भर्ता मन्त्रयति, तथा तर्कयामि, त्वामेवानुनेतुमागच्छति, तदुपसर्पतु भर्त्री।

(३) तस्मात् अलक्षितमेव पृष्ठतो गत्वा, कण्ठे गृहीत्वा, प्रसादयिष्यामि।

(४) भवति सागरिके! विस्रब्धा भूत्वा, प्रियवयस्यमालप।

(५) काञ्चनमाले! सागरिकापि अत्रैव तिष्ठति, तस्मात् तावत्, ज्ञात्वा यत्नादुपसर्पिष्यामि।

Digitized by Google

दादोवि अधिअवल्लहाए देवीए, पुणोवि अत्ताणअं अवराहिणं करेसि ? (१)।

राजा। अयि मिथ्यावादिनी खलुसि। कुतः

श्वासोत्कम्पिनि कम्पितं स्तनयुगे, मौने प्रियं भाषितम्
वक्त्रे ऽस्याः कुटिलीकृतभ्रुवि रुषा यातं मया पादयोः।
दृष्टं मः सहजाभिजात्यजनिता सेवैव देव्याः परम्
प्रेमाबन्धविवर्द्धिताधिकरसा प्रीतिस्तु या सा त्वयि॥ (क)

वास। उवट्ठिअ अरोषम्। अज्जउत्त! सरिसं एदं (२)

राजा। दृष्ट्वा सवैलक्ष्यम्। देवि! न खलु कारणेन मामुपालब्धुमर्हसि। त्वामेव मत्वा वेश्यासादृश्यविप्रलब्धा वयमिहागताः। तत् क्षम्यताम्। इति पादयोः पतति।

---

(१) भर्त्तः! किमेतेन अलीकदाक्षिण्येन, जीवितादपि अधिकवल्लभाया देव्याः पुनरपि आत्मानमपराधिनं करोषि ?।

(२) आर्यपुत्र! सदृशमिदम्।

(क) श्वासेति। अस्याः स्तनयुगे श्वासेनोत्कम्पिनि उत्कम्पयुक्ते सति मया कम्पितं मौने अस्यास्तूष्णीम्भावे सति प्रियं चाटुभाषितं अस्या वक्त्रे रुषा प्रणयकोपेन कुटिलीकृते भ्रुवौ यत्र तादृशे सति मया पादयोर्यातं। इत्यनेन प्रकारेण नोऽस्माकं सहजेन नैसर्गिकेण आभिजात्येन कुलगौरवेण जनिता सेवैव परं केवलं देव्या एवम्भूता सैवैव केवलं देव्यै मया क्रियत इत्यर्थः। तु किन्तु प्रेमाबन्धेन प्रणयवर्द्धनेन विवर्द्धितो वृद्धिं गतोऽधिवेगं रसोऽनुरागो यत्र एवम्भूता या प्रीतिः प्रेम सा त्वयि विद्यते इत्यर्थः त्वयितु प्रणयाक्रान्तं मे मनः समर्पितमस्ति, देव्यै तु केवलं अनिच्छया मनो दीयत इत्यतो मयि कोपस्ते अन्याय इति भावः।

Digitized by Google

दास। सरोषम्। अज्जउत्त! उट्ठेहि उट्ठेहि, किं अज्जवि सहजाभिजादाए सेवाए दुःखं अणुभवीअदि? (१)

राजा। सक्रोधम्। किमेतदपि श्रुतं देव्या? तत् सर्वथा देवीप्रसादनोपायं प्रति निराशीभूतः स्मः। इत्यधोमुखस्तिष्ठति।

विदू। भोदि! तुमं किल अत्ताणअं उव्वन्धिअ बाबादेसेत्ति वेससारिच्छमोहिदेण मए पिअवअस्सो एत्थ आणीदो। जइ मम वअणं ण पत्तिआअसि, ता पेक्ख इमं लदापासं (२)। इति लतापाशं दर्शयति।

दास। सक्रोपम्। हञ्जे कञ्चणमाले! एदेण एव्व लदापासेण बन्धिअ गेण्ह बह्मणं एणं, दुट्ठकञ्चुआं अ अग्गदो करेहि (३)।

काञ्च। जं देवी आणवेदि। इति लतापाशेन वसन्तकं गले बध्वा, ताड़यति। हदास! अणुभव दाव अत्तणो अविणअस्स फलं, देवीए दुव्वअणेण कडुइदाइं सोत्ताइंत्ति सुमरेहि तं बअणं, सामरिए! तुमंपि अग्गदो होहि (४)!

---

(१) आर्यपुत्र! उत्तिष्ठोत्तिष्ठ। किमद्यापि सहजाभिजातया सेवया दुःखमनुभूयते?

(२) भवति! त्वं किल आत्मानमुद्बध्य विपद्यसे इति वेशसादृश्य मोहितेन मया प्रियवयस्योऽत्र आनीतः। यदि मे वचनं न प्रत्ययसे, तदा पश्य इमं लतापाशम्।

(३) हञ्जे काञ्चनमाले! एतेनैव लतापाशेन बद्ध्वा गृहाणैनं ब्राह्मणम्, इमां दुष्टकञ्चुकाञ्च अग्रतः कुरु।

(४) हताश! अनुभव तावदात्मनोऽविनयस्य फलं, देव्या दुर्वचनेन

सागः । स्वगतम् । अकिदपुण्णाए मए मरिदुंपि अत्तणो इच्छाए ण पारिदं (१) ।

विदू । सविषादम् । भो वअस्स ! सुमरेहि मं अणाधं देवीए बन्धणादो विप्पज्जन्तं (२) । इति राजानमवलोकयति ।

सर्व्वानादाय निष्क्रान्ता वासवदत्ता ।

राजा । सखेदम् । कष्टं भोः कष्टम् !

किं देव्याः कृतदीर्घरोषमुषितस्निग्धस्थितं तन्मुखम्
किं वा सागरिकां क्रमोद्वतरुषा संसर्ज्जयमानां तथा ।
वध्वा नीतमितो वसन्तकमहं किं चिन्तयाम्यद्य भोः,
सर्व्वाकारकृतव्यथः क्षणमपि प्राप्नोमि नो निर्वृतिम् (क)

तत् किमिदानीमिह स्थितेन प्रयोजनम्, देवीं प्रसादयितुमभ्यन्तरमेव प्रविशामि । इति निष्क्रान्तः ।

इति सङ्केतो नाम

तृतीयोऽङ्कः ।

कट्ठजणाणि श्रोवाणीति स्मर तद्वचनम् । सागरिके ! त्वमपि अपती भव ।

(१) अकृतपुण्यया मया मर्त्तुमपि आत्मन इच्छया न शक्यम् ।

(२) भो वयस्य ! स्मर मामनाथं देव्या बन्धनात् विपद्यमानम् ।

(क) किमिति । कृतेन दीर्घेण रोषेण मुषितमपहृतं स्निग्धं स्थितं स्वभावस्थितं यस्मात् तत् देव्या मुखं किं चिन्तयामि, तथा क्रमेणोद्वता उद्दिता रुग् यस्या तया देव्या सन्तर्ज्ज्यमानां सागरिकां वा किमहं चिन्तयामि, किंवा इतो वध्वा नीतं स्थानान्तरं प्रापितं वसन्तकमहं चिन्तयामि, भो ! अद्य सर्व्वाकारेषु कृतव्यथः अथवा सर्व्वाकारेण सर्व्वथा कृतव्यथः असुस्थचित्तोऽहं क्षणमपि नो निर्वृतिं सुखं प्राप्नोमि, दुःखितस्य सुखोत्पत्त्यभावादिति भावः ।

Digitized by Google

चतुर्थोऽङ्कः ।

—oo—

ततः प्रविशति रत्नमालामादाय सारिका सुसङ्गता ।

हंसं । सकरुणम् निश्वस्य । हा पिअसहि सागरिए ! हा लज्जालुए ! हा सहीगणवच्छले ! हा उदारसीले ! हा सोम्मदंसणे ! कहिं गदा दाणिं तुमं मए पेक्खिदव्वा । इति रोदिति । ऊर्ध्वमवलोक्य निश्वस्य च । हंहो देव्वहदअ ! अकरुण ! असामाण्णरूपसोहा तादिसी तुए जइ णिम्मिदा, ता कीस उण ईदिसं अवत्थन्तरं पाविदा । इयञ्च रत्नमालावि, जीविदणिरासाए ताए, कम्मवि बम्हणस्स हत्थे पडिवादेसुत्ति भणिअ, मम हत्थे समप्पिता, ता जाव बम्हणं अण्णेसामि । नेपथ्याभिमुखमवलोक्य । अए कहं एसो क्खु बम्हणो वसन्तओ इध ज्जेव्व आअच्छदि, ता इमस्सिं एव्व पडिवादेसि (१) ।

---

(१) हा प्रियसखि सागरिके ! हा लज्जालुके ! हा सखीगणवत्सले ! हा उदारशीले ! हा सौम्यदर्शने ! कुत्र गतेदानीं त्वं प्रेक्षितव्या । हंहो दैवहतक ! अकरुण ! असामान्यरूपशोभा तादृशी त्वया यदि निर्म्मिता, तत् कथं पुनरीदृशमवस्थान्तरं प्रापिता । इयञ्च रत्नमालापि, जीवितनिराशया तया, कस्यापि ब्राह्मणस्य हस्ते पतिपादयेति भणित्वा मम हस्ते समर्पिता, तद्यावत् ब्राह्मणमन्वेषयामि । अये कथमेष खलु ब्राह्मणो वसन्तक इहैव आगच्छति, तदस्मै एव पतिपादयामि ।

Digitized by Google

ततः प्रविशति कृष्टो वसन्तकः ।

वस । होही भोः ! अज्ज खलु पिअवअस्सेण पसादिदाए देवीए वासवदत्ताए बन्धणादो मोचिअ, सहत्थदिण्णेहिं मोदअलड्डुएहिं उदरं किदं मे सुपूरिदं, अण्णञ्च एदं पट्टं अम्बरजुअलं, कण्णाभरणं अ दिण्णं, ता जाव दाणिं पिअवअस्सं पेक्खिस्सं (१)। इति परिक्रामति ।

सुसं । रुदती रुहसोपहत्थ । अज्ज वसन्तअ, चिट्ठ दाव तुमं मुहुत्तअं (२)।

विदू । दट्ठा । कधं सुसङ्गदा ? सुसङ्गदे ! एत्थ किं णिमित्तं रोईअदि ? किं णु खलु सारिआए अत्ताहिदं संवुत्तं (३)

सुसं । अज्ज वसन्तअ अहं जेव्व णिवेदइस्सं, सा खलु तवस्सिणी देवीए उज्जइणिं पेसिदेत्ति जणप्पवादं कदुअ, उवट्ठिदे अद्धरत्तेण जाणीअदि कहिं णीदेत्ति (४)।

---

(१) कथं खलु प्रियवयस्येन प्रसादितया देव्या वासवदत्तया बन्धनान्मोचयित्वा स्वहस्तदत्तैर्मोदकलड्डुकैः सुपूरितं उदरं कृतम्, अन्यच्च पट्टाम्बरयुगलं कर्णाभरणञ्च दत्तं, तदावदिदानीं प्रियवयस्यं प्रेक्षिष्ये ।

(२) आर्य्य वसन्तक ! तिष्ठ त्वं तावन्मुहूर्त्तकम् ।

(३) सुसङ्गते ! अत्र किं निमित्तं रुद्यते ? किं नु खलु सारिकाया अत्याहितं संवृत्तम् ।

(४) आर्य वसन्तक ! अहमेव निवेदयिष्यामि, सा खलु तपस्विनी देव्या उज्जयिनीं प्रेषितेति जनप्रवादं कृत्वा, उपस्थिते अर्द्धरात्रे न ज्ञायते कुत्र नीतेति ।

Digitized by Google

विदू। सोहेगम्। भोदि सागरिए! हा असामाण्णरूवसोहे! हा मिदुभासिणि! अदिणिट्ठुरं दे देव्वेण किदं (१)।

सुसं। एसा रअणमाला, ताए जीविदणिरासाए अज्जवसन्तअस्स हत्थे पडिवादेसुत्ति भणिअ, मम हत्थे समप्पिदा, ता णं गेण्हदु अज्जो एदं (२)।

सागरिकरूपं कर्णौ पिधाय। भोदि! कधं मम इदिसे पत्थावे एदं गेण्हिदुं हत्थो पसरदि (३)। हला औ रदहः।

सुसं। अञ्जलिं बद्धा। ताए एव्व अणुग्गहं करन्तो अङ्गीकरेदु एदं अज्जो (४)।

विदू। विचिन्त्य। अहवा, उवणेहि, जेण इमाए लज्जिआ सागरिआविरहुक्कण्ठिदं पिअवअस्सं विणोदेमि (५)।

सुसं। वसन्तकस्य हस्ते रत्नमालां ददाति।

विदू। गृहीत्वा निरूप्य सविस्मयम्। भोदि! कुदो उण इदिसस्स अलङ्कारस्स समागमो? (६)।

---

(१) भवति सागरिके! हा असामान्यरूपशोभे! हा मृदुभाषिणि! अतिनिष्ठुरं ते दैवेन कृतम्।

(२) एषा रत्नमाला, तया जीवितनिराशया आर्यवसन्तकस्य प्रतिगृह्येति भणित्वा, मम हस्ते समर्पिता, तत् प्रतीच्छत्वेनां आर्यः।

(३) भवति! कथं ममेदृशे प्रस्तावे इमां गृहीतुं हस्तः प्रसरति।

(४) तस्या एवानुग्रहं कुर्वन् अङ्गीकरोतु आर्यः।

(५) अथवा, उपनय, येनानयैव सागरिकाविरहोत्कण्ठितं प्रियवयस्यं विनोदयामि।

(६) भवति! कुतः पुनरीदृशस्यालङ्कारस्य समागमः?

Digitized by Google

सुसं । अज्ज ! मएवि कोदूहलेण पुच्छिदं व्व (१) ।

विदू । तदो ताए किं भणिदं ? (२) ।

सुसं । तदो मा उत्तं पेक्खिअ, दीहं णिस्ससिअ, सुसङ्गदे ! किं दाणिं तुह इमाए कधाएत्ति भणिअ, रोदुं पउत्ता (३)

विदू । णं कधिदं एव्व ताए सामण्णजणदुल्लहेण इमिणा परिच्छदेण सव्वधा महाभिजणसमुप्पण्णाए ताए होदव्वं । सुसङ्गदे ! पिअवअस्सो दाणिं कहिं ? (४) ।

सुसं । अज्ज ! एसो क्खु भट्टा देवीभवणादो णिक्कमिअ, फडिअसिलोमण्डवं गदो, ता गच्छदु अज्जो, अहंपि देवीए वासवदत्ताए परिचारिणी भविस्सं (५) इति निष्क्रान्तौ प्रवेशकः ।

ततः प्रविश्यासनस्थो राजा ।

राजा । विचिन्त्य ।

---

(१) आर्य ! मयापि कुतूहलेन पृष्टमेव ।

(२) तदा तया किं भणितम् ?

(३) तदा सा मामुक्त्वा प्रेक्ष्य दीर्घं निश्वस्य, सुसङ्गते ! किमिदानीं तव अनया कथयेति भणित्वा, रोदितुं प्रवृत्ता ।

(४) ननु कथितमेव मया, सामान्यजनदुर्लभेन अमुना परिच्छदेन सर्वथा महाभिजनसमुत्पन्नया तया भवितव्यम् । सुसङ्गते ! प्रियवयस्य इदानीं कुत्र ।

(५) आर्य ! एष खलु भर्ता देवीभवनतो निष्क्रम्य, स्फटिकशिलामण्डपं गतः, तद्गच्छत्वार्यः, अहमपि देव्या वासवदत्तायाः परिचारिका भविष्यामि ।

Digitized by Google

सद्भ्याजैः प्रपथैः प्रियेण वचसा चित्तानुवृत्त्याधिकम्
वैलक्षण्येन परेण पादपतनैर्वाक्यैः सखीनां मुहुः।
प्रत्यासत्तिमुपागता नहि तथा देवी रुदत्या यथा
प्रस्राव्येव तयैव वाष्पसलिलैः कोपोऽपनीतः स्वयम्॥ (क)

श्लोकार्द्धं विस्मृत्य। तावदिदानीं देव्यां प्रसादितायां, वासरिकाचित्तमेव केवलं बाधते। कुतः

अम्भोजगर्भसुकुमारतनुस्तदासौ
कण्ठग्रहे प्रथमरागघने विलीय।
सद्यः पतन्मदनमार्गणरन्ध्रमार्गैः
मन्ये मम प्रियतमा हृदयं प्रविष्टा॥ (ख)

विचिन्त्य। योऽपि मे विश्रामस्थानं वसन्तकः, सोऽपि देव्या संयतः, तत् कस्याग्रतो वाष्पमोक्षं करिष्ये। इति निश्चित्य।

(क) सद्भ्याजैरिति। देवी वासवदत्ता सद्भ्याजैः सत्कपटैः प्रपथैः प्रियेण वचसा चाटूक्त्या अधिकं चित्तानुवृत्त्या चित्तानुवर्त्तित्वेन परेभ्योऽधिकेन वैलक्षण्येन सज्ज्ञया, पादपतनैः प्रणामैर्मुहुः सखीनां वाक्यैः नहि तथा प्रत्यासत्तिं प्रसादमुपागता प्राप्तिता यथा तयैव रुदत्या देव्या वाष्पसलिलैर्नयनजलैः प्रस्राव्येव स्वयं कोपोऽपनीतः प्रयोजितः। यथादिभिरुपायैर्देव्याः कोपो नापनीतः यथा तयैव विरञ्चरोदनैरिति तात्पर्यार्थः।

(ख) अम्भोजेति। तदा प्रथमदर्शनकाले अम्भोजगर्भवत् कमलगर्भवत् सुकुमारा कोमला तनुः शरीरं यस्याः असौ प्रिया वासरिका प्रथमेन नवेन रागेणानुरागेण घने प्रगाढे कण्ठग्रहे आलिङ्गने विलीय तदङ्गे सद्यःप्राप्तेन सद्यस्तत्क्षणादालिङ्गनसमय एव पतता क्षिप्यमाणां मदनमार्गणरन्ध्राणां कामशराणां मार्गैः पथैः मम हृदयं प्रविष्टेव मन्ये अन्यथा सर्वं हृदेव क्षिप्त्वा स्फुरतीति भावः।

Digitized by Google

ततः प्रविशति वसन्तकः।

वस। परिक्रम्यावलोक्य च सविस्मयम्। एसो क्खु पिअवअस्सो णिरन्तरुक्कण्ठापरिक्खामपि सलाहणिज्जं तणुं समुव्वहन्तो, उदितो, दुइआचन्दोविअ अहिअदरं सोहदि, ता जाव णं उपसप्पामि। उपसृत्य। सोत्थि भवदे, दिट्ठिआ वड्ढसे, देवीहत्थगदेणापि मए पुणोवि एदेहिं अच्छीहिं जं दिट्ठोसि (१)।

राजा दृष्ट्वा सहर्षम्। अये वसन्तकः प्राप्तः। सखे! परिष्वजस्व माम्।

विदू। परिष्वज्य। भो वअस्स! देवीए अणुग्गहीदोसि (२)।

राजा। वेत्रेणैव निवेदितस्ते देव्याः प्रसादः, तत् कथयतामिदानीं सागरिकायाः किं वर्त्तत इति।

विदू। सव्वेलक्खमधोसुखस्सिदति।

राजा। वयस्य! किं न कथयसि?

विदू। अप्पिअं णिवेदिदुं दे ण पारेमि (३)।

राजा सोद्वेगम् ससम्भ्रमम्। वयस्य! कथमप्रियम्? किं? व्यक्तमेवोत्सृष्टं जीवितं तया?। हा प्रिये सागरिके!। इति मोहं नाटयति।

---

(१) एषः! खलु प्रियवयस्यो निरन्तरोत्कण्ठापरिक्षामामपि श्लाघनीयां तनुं समुद्वहन्, उदितो, द्वितीयाचन्द्र इव अधिकतरं शोभते, तद्यावदेनमुपसर्पामि। स्वस्ति भवते, भो दिष्ट्या दृश्यसे, देवीहस्ततेनापि मया पुनरपि एतैरभिलषितैर्यद् दृष्टोऽसि।

(२) भो वयस्य! देव्या अनुगृहीतोऽस्मि।

(३) अप्रियं निवेदितुं ते न शक्नोमि।

Digitized by Google

विदू। रुक्खम्मम्। समस्सासदु समस्सासदु, पिअवअस्सो (१)

राजा। समाश्वसिहि वाक्यम्।

प्राणाः परित्यजत कामममद्विधं माम्
रे दक्षिणा भवत मद्वचनं कुरुध्वम्।
शीघ्रं न यात यदि तन्मुषिताः स्थ यस्मात्
याता सुदूरमधुना गजगामिनी सा॥ (क)

विदू। भो! मा अण्णधा सम्भावेहि, सा खु तवस्सिणी देवीए उज्जइणिं पेसिदत्ति सुणीअदि, अदो मए अप्पिअंत्ति भणिदं (२)

राजा। कथमुज्जयिनीं प्रेषिता? अहो निरवरोधा मयि देवी। वयस्य! केन तवैतदाख्यातम्?।

विदू। भो! सुसङ्गदाए। अण्णं च, मम हत्थे केणावि कज्जेण दूअं रअणमाला पेसिदा (३)।

---

(१) समाश्वसितु, समाश्वसितु, प्रियवयस्यः।

(२) भोः! मा अन्यथा सम्भावय, सा खलु तपस्विनी देवी उज्जयिनीं प्रेषितेति श्रूयते, अतो मया अप्रियमिति भणितम्।

(३) भोः! सुसङ्गतया। अन्यच्च, मम हस्ते तया केनापि कार्येण दूतं रत्नमाला प्रेषिता।

(क) प्राणा इति। रे प्राणाः! यूयं कामयतेऽमदद्विधं मकरध्वजं यो मथितवान्, मां परित्यजत गच्छत, रे प्राणाः! यूयं दक्षिणा अनुकूला भवत, मद्वचनं कुरुध्वं पालयध्वं यदि शीघ्रं त्वरितं न यात तर्हि नूनं मुषिता वञ्चिताः स्थ यतः गजगामिनी गजेन्द्रगतिः सुन्दरी सा मे सागरिका अधुना सुदूरं याता अतः सा दुर्लभेति।

Digitized by Google

राजा। किमपरं मामाश्वासयितुम्। तद्वयस्य! उपनय।

विदू। उवणयामि।

राजा। अवहीत्वा रत्नमालां, निर्वर्ण्य, हृदये निधाय। साधु।

कण्ठाश्लेषं समासाद्य तस्याः प्रभ्रष्टयानया।
तुल्यावस्था सखीवेयं तनुराश्वस्यते मम॥ (क)

वयस्य! त्वं परिधत्स्वैनां, येन वधमेनामपि सावद्दृष्ट्वा धृतिं करिष्यामः।

विदू। जं भवं आणवेदि। इति कण्ठे परिदधाति।

राजा। साधु निवृत्तम्। वयस्य! दुर्लभं सुमनोदर्शनं प्रियायाः।

विदू। दिट्ठो अवलोओ वअस्सस्स। भो! मा एव्वं उत्तं मन्तेहि, कदावि कोवि देवीए एत्थ सञ्चरदि (१)।

ततः प्रविशति वेत्रहस्ता वसन्तसेना।

वसं। जअदु जअदु भट्टा। एसो क्खु कुमणदो भाइणेओ विजअवम्मा, किंपि णिवेदिदुकामो, दुवारे चिट्ठदि (२)।

---

(१) भो! मा एवं उक्तैः मन्त्रय, कदापि कोऽपि देव्या अत्र सञ्चरति।

(२) जयतु जयतु भर्त्ता, एष खलु कुमनसो भागिनेयो विजयवर्म्मा किमपि निवेदयितुकामो द्वारे तिष्ठति।

(क) कण्ठेति। तस्याः कण्ठाश्लेषमालिङ्गनं समासाद्य प्रभ्रष्टया स्खलितयाऽनया रत्नमालया तुल्या समाना अवस्था यस्याः सा सखी वेयं मम तनु राश्वस्यते आश्वासं लभते।

Digitized by Google

राजा। वसुन्धरे! अविलम्बितं प्रवेशय।

वसु। जं देवी आणवेदि। निष्क्रम्य, विजयवर्म्मणा सह पुनः प्रविश्य च। विजयवम्म! एसो क्खु भट्टा, ता उपसप्पदु अज्जो एणं (१)।

विजयवर्म्मा। उपसृत्य। जयतु जयतु देवः। देव! दिष्ट्या वर्द्धसे, कमखती विजयेन।

राजा। सपरितोषम्। विजयवर्म्मन्! अपि जिताः कोशलाः?

विजय। देवस्य प्रसादात्।

राजा। साधु कमखन्! साधु, अचिरान्महत्प्रयोजनमनुष्ठितम्। विजयवर्म्मन्! तत् कथय कथामतिविस्तरतः श्रोतुमिच्छामि।

विजय। देव! श्रूयताम्। वयमितो देवादेशात् कतिपयैरेवाहोभिरनेककरितुरगपत्तिदुर्निवारेण महता बलसमूहेन गताः कमखान् विन्ध्यदुर्गावस्थितस्य कोशलनृपतेर्द्वारमवष्टभ्य, सेनाः समावेशयितुमारब्धवान्।

राजा। ततस्ततः।

विजय। ततः कोशलेश्वरोऽपि अतिदर्पात् कमखन्परिभवमसहमानो, ह्यस्तिकप्रायमशेषमात्मसैन्यं सज्जीकृतवान्।

विदू। भो! लहुं लहुं आचक्ख, वेवदि मे हिअअं।

राजा। ततस्ततः।

विजय। देव! कृतनिश्चयश्चासौ।

---

(१) विजयवर्म्मन्! एष खलु भर्त्ता, तदुपसर्पतु आर्य्य एनम्।

Digitized by Google

योद्धुं निर्गत्य विन्ध्यादभवदभिमुखस्तत्क्षणं दिग्विभागान्
विन्ध्येनेवापरेण द्विपपतिपृतनापीड़बन्धेन रुन्धन्।
वेगाद्दाणान् विमुञ्चन्नथ समदगजोत्पिष्टपत्तिर्निपत्य
प्रत्यायाद्दाङ्क्षितास्तिद्विगुणितरभसस्तं क्षमख्यान् क्षणेन ॥ (क)

अपिच।

अस्त्रव्यस्तशिरस्त्रशस्त्रकषणैः क्तत्तोत्तमाङ्गे क्षणम्
व्यूढ़ासृक्सरितीति स्खलत्प्रहरणे वर्मोद्वमद्दङ्गिनि।
आह्वयाजिमुखे स कोशलपतिर्भग्ने प्रधाने बले—
राजा। कथमस्मदीयान्यपि बलानि भग्नानि?
विजय। एकेनैव क्षमख्यता शरशतैर्भग्नस्तद्विपस्थो हतः ॥ (ख)

(क) योद्धुमिति। क्षमख्यान् सेनापतिः योद्धुं युद्धं कर्त्तुं विन्ध्यात् पर्वतात् निर्गत्य अभिमुखोऽभवत्। तत्क्षणं अपरेण विन्ध्येनेव द्विपपति पृतनापीड़बन्धेन गजसेनासम्बृहघटनया दिग्विभागान् दिगन्तान् रुन्धन् व्याप्नुवन्, अथ समदैर्मत्तैर्गजैरुत्पिष्टा विनाशिताः पत्तयो येन स तथा निपत्य अपगामी भूत्वा याञ्छितस्य अभिलषितस्य वस्तुनः आप्तये प्राप्तये द्विगुणितो रभसोवेगो यस्य तादृशः सन् क्षणेनैतं कोशलेशं प्रत्यायात् प्राप।

(ख) अस्त्रेति। अस्त्रैर्व्यस्तानि विच्छिन्नानि यानि शिरस्त्रशस्त्राणि तैः कषणैः राघातैः क्तत्तानि च्छिन्नानि उत्तमाङ्गानि यस्मिन् तस्मिन् क्षणं व्यूढासृक् सरिति प्रबलवेगेन प्रवहमानरक्तनदीके स्खलत्प्रहरणे शब्दायमानायुधे वर्मभ्य उद्वमन् उद्गच्छन् वङ्गिर्यस्मिन् तस्मिन् आजिमुखे संग्रामारम्भे आह्वय स कोशलपतिः प्रधाने बले सैन्ये भग्ने विनष्टे सति एकेनैकेनैव न तु सहायवतेत्यर्थः क्षमख्यता शरशतैः करणैर्भग्नद्विपस्थोऽसौ हतः विनाशितः।

Digitized by Google

विदू। जेदु जेदु भवं, जिदं अम्हेहिं! इति नृत्यति।

राजा। साधु कोशलपते! साधु, मृत्युरपि ते श्लाघ्यः, यस्य हि रिपवोऽपि पुरुषकारमेवं वर्णयन्ति। ततस्ततः,

विजय। देव! ततो रुमण्वानपि कोशलेषु मद्भ्रातरं ज्यायांसं जयवर्माणं स्थापयित्वा, प्रहारव्रणितहास्तिकप्राय-मशेषसैन्यमनुवर्त्तमानः शनैः शनैरागच्छत्येव।

राजा। वसुन्धरे! उच्यतां यौगन्धरायणः प्रदर्श्यतां मत्-प्रसादस्य विभव इति।

वसु। जं देवो आणवेदि। विजयवर्म्मणा सह निष्क्रान्ता।

ततः प्रविशति काञ्चनमाला।

काञ्च। आणत्तम्हि देवीए, जह गच्छ, हञ्जे कञ्चणमाले! एदं इन्दजालिअं अज्जउत्तस्स दंसेहि। इति परिक्रम्यावलोक्य च। एसो क्खु भट्टा, ता जावणं उपसप्पामि। उपसृत्य। जेदु जेदु भट्टा। भट्टा! देवी विण्णवेदि एसो क्खु उज्जयिणीदो सम्बरसिद्धि णाम, इन्दजालिओ आअदो, ता पेक्खदु भट्टा(१)

राजा। अस्ति नः कौतुकमैन्द्रजालिके, ततः शीघ्रं प्रवेशय।

काञ्च। जं भट्टा आणवेदि। निष्क्रम्य पिच्छिकाहस्तेनैन्द्रजालि-केन सह प्रविशति।

चेटी। एदु एदु अज्जो।

ऐन्द्रजालिकः। परिक्रामति।

---

(१) आज्ञप्तास्मि देव्या, यथा गच्छ, हञ्जे काञ्चनमाले! इममैन्द्रजा-लिकमार्य्यपुत्रस्य दर्शय। एष खलु देवः, तदावेदनमुपसर्पामि। जयतु जयतु भर्त्ता, देव! देवी विज्ञापयति, एष खलु उज्जयिनीतः, सम्बर-सिद्धिनामैन्द्रजालिक आगतः, तत् पश्यतु देवः।

चेटी। एसो भट्टा, ता उवसप्पदु अज्जो (१)।

ऐन्द्र। उपसृत्य। जअदु जअदु भट्टा। पिच्छिकां भ्रामयित्वा बङ्कवा हास्यं कृत्वा।

पणमह चलणे इन्दस्स इन्दजालिअत्ति लक्खणामस्स।
तह ज्जेव अज्ज सम्बरस्स मायासुपरिट्ठिदजसस्स॥

देव, किम्

धरणीए मिअङ्को, आआसे महिअरो, जले जलणो।
मज्झह्णह्मि पओसो, दाव सिज्झउ, देहि आसत्तिं॥ (२)

विदू। भो वयस्स! अवहिदो होहि, भो! दुद्दिसो से अवट्टम्भो जेण सव्वं सम्भावीअदि (३)।

ऐन्द्र। देव! अहवा

किं जप्पिदेण बहुणा, जं जं हिअएण महसि संदट्ठुं।
तं तं दंसेमि अहं, गुरुणो मन्तप्पहावेण॥ (४)।

---

(१) एष भर्त्ता, तदुपसर्पतु आर्यः।

(२) प्रणमत चरणौ इन्द्रस्य इन्द्रजालिकेति लक्ष्यनाम्नः।
तथैव अद्य सम्बरस्य मायासुप्रतिष्ठितयशसः॥

देव किम्।

धरण्यां मृगाङ्कः, आकाशे महीधरो जले ज्वलनः।
मध्याह्ने प्रदोषस्तावत् सिध्यतु देहि आत्मानम्॥

(३) भो वयस्य! अवहितो भव, भोः दृष्टयोऽस्यावष्टम्भो येन सर्वं सम्भाव्यते।

(४) अथवा

किं जल्पितेन बहुना, यद्यत् हृदयेन वाञ्छसि संद्रष्टुं।
तं तं दर्शयामि अहं, गुरोर्मन्त्रप्रभावेण॥

Digitized by Google

राजा। भद्र! तिष्ठ तावत्। काञ्चनमाले! उच्यतां देवी, सुप्तदीव एवायमैन्द्रजालिकः, विजनीकृतश्चायमुद्देशः, तदागच्छ, सहितावेवैनं पश्यावः।

चेटी। जं भट्टा आणवेदि। निष्क्रम्य वासवदत्तया सह प्रविशति।

वास। काञ्चणमाले! उज्जइणीदो आअदोत्ति, अत्थि मे तस्सिं इन्दजालिए बक्खवादो (१)।

काञ्च। णादिउलबहुमाणो क्खु एसो देवीए, ता एदु एदु भट्टिणी (२)। इति परिक्रामतः।

काञ्च। भट्टिणि! एसो भट्टा, ता उपसप्पदु देवी (३)।

वास। उपसृत्य। जेदु जेदु अज्जउत्तो।

राजा। देवि! बहुतरमनेन गर्जितम्, तदिहस्थावेवैनं पश्यावः।

वास। उपविशति।

राजा। भद्र! प्रस्तूयतां बहुविधमिन्द्रजालम्।

ऐन्द्र। जं देवो आणवेदि। बहुविधं नाट्यं कृत्वा पिच्छिकां भ्रामयन्।

हरिहरब्रह्मप्पमुहं देवं दंसेमि देवराअं अ।
गअणम्मि सिद्धचारणसुरबहुसत्थञ्च णच्चन्तं (४)॥

---

(१) काञ्चनमाले! उज्जयिनीत आगत इति, अस्ति मे तस्मिन्नैन्द्रजालिके पक्षपातः।

(२) ज्ञातिकुलबहुमानः खलु देव्याः, तदागच्छतु आगच्छतु भर्त्री।

(३) भर्त्रि! एष भर्त्ता, तदुपसर्पतु देवी।

(४) हरिहरब्रह्मप्रमुखान् देवान्, दर्शयामि, देवराजञ्च।
गगने सिद्धचारणसुरबधूसार्थञ्च नृत्यन्तम्॥

Digitized by Google

सर्वे। सविस्मयम् पश्यन्ति।

राजा। अहो आसनादवतरन्। आश्चर्यमाश्चर्यम्।

विदू। अच्छरीअं अच्छरीअं।

दास। अच्छरीअं अच्छरीअं।

राजा। देवि! पश्य,

एष ब्रह्मा सरोजे रजनिकरकलामौलिरेष शङ्करोऽयम्
दोर्भिर्दैत्यान्तकोऽसौ सधनुरसिगदाचक्रचिह्नैश्चतुर्भिः।
एषोऽप्यैरावतस्थस्त्रिदशपतिरमी देवि! देवास्तथान्ये
नृत्यन्ति व्योम्नि चैताश्चलचरणरणन्नूपुरा दिव्यनार्यः॥(क)

दास। अच्छरीअं अच्छरीअं।

विदू। अपवार्य। हा दासीए पुत्त इन्दजालिअ! किं एदेहिं, देवेहिं अच्छराहिं च दंसिदाहिं, जइ दे इमिणा परितुट्टेण कज्जं, ता दंसेहि सागरिअं (१)।

---

(१) हा दास्याः पुत्र ऐन्द्रजालिक! किमेतैर्देवैरप्सरोभिश्च दर्शिताभिः, यदि ते अनेन परितुष्टेन कार्यं, तत् दर्शय सागरिकाम्।

(क) एष इति। सरोजे पद्मासने एष ब्रह्मा, रजनिकरस्य चन्द्रस्य कला एकात्मिका मौलिरे यस्य सोऽयं शङ्करः, धनुषा सह वर्त्तमानानि असिगदाचक्राण्येव चिह्नानि येषां ते चतुर्भिर्दोर्भिर्हस्तैरुपलक्षितोऽसौ दैत्यान्तको विष्णुः, ऐरावतस्थ एषोऽपि त्रिदशानां देवानां पतिरिन्द्रः हे देवि! तथा अन्ये अमी देवाः, किञ्च चलेषु चरणेषु रणन्ति नूपुराणि यासां ता एता दिव्यनार्योऽप्सरसश्च व्योम्नि नृत्यन्ति।

Digitized by Google

ततः प्रविशति वसुन्धरा।

वसु। राजानमुपसृत्य। जेदु जेदु भट्टा, अमच्चजोअन्धरायणो विण्णवेदि, एसो क्खु विक्कमबाहुणा कञ्चुइणा सह अणुप्पेसिदो वसुभूदी, ता अहिहदि देवो इमस्सिं एव्व सुन्दरमुहुत्तए पेक्खिदुं अहंपि कज्जसेसं समापिअ आअदोज्जेव्व (१)।

वास। अज्जउत्त! चिट्ठदु दाव पेक्खणअं माउच्छकुमारादो अज्ज अमच्चप्पधाणो अमच्चवसुभूदी आअदो ता एदं दाव पेक्खदु अज्जउत्तो (२)।

राजा। यथाह देवी। ऐन्द्रजालिकं प्रति। भद्र! विश्राम्यतामिदानीम्।

ऐन्द्र। पुनः यवनिकां भ्रामयति। जं देवो आणवेदि! विस्सामन्तु। मे एक्को उण खेड्डणओ अवस्सं देविए पेक्खिदव्वो (३)।

राजा। भद्र! द्रक्ष्यामः।

वास। कञ्चनमाले! गच्छ तुमं देहि से पारितोसिअं (४)।

---

(१) जयतु जयतु भर्त्ता, अमात्ययौगन्धरायणो विज्ञापयति, एष खलु विक्रमबाहुना कञ्चुकिना सह अनुप्रेषितो वसुभूतिः, तदर्हति देवोऽस्मिन्नेव सुन्दरमुहूर्ते प्रेक्षितुम्, अहमपि कार्यशेषं समाप्यागत एव।

(२) आर्यपुत्र! तिष्ठतु तावत् प्रेक्षणकम्, मातुलकञ्चुकाद्व्यापारान्तरप्रधानः अमात्यवसुभूतिरागतस्तदिदं तावत् प्रेक्षतामार्यपुत्रः।

(३) अयमेकः पुनः खेलनको देव्यावश्यं प्रेक्षितव्यः।

(४) काञ्चनमाले! यच्छ त्वं देह्यस्य पारितोषिकम्।

Digitized by Google

चेटी । जं दवी आणवेदि । ऐन्द्रजालिकेन सह निष्क्रान्ता ।

राजा । वसन्तक ! प्रत्यक्षम्य, प्रवेश्यतां वसुभूतिः ।

विदू । जं भट्टा आणवेदि । निष्क्रान्तः ।

ततः प्रविशति वसन्तकेन सह वसुभूतिः बाह्मणश्च ।

विदू । एदु एदु अनग्घो ।

वसु । समन्तादवलोक्य अहो वत्सेश्वरस्याभावः । दृष्ट हि

आच्छिन्नो जयकुञ्जरेण तुरगान् निर्वर्णयन् वल्गतान्

सङ्गीतध्वनिना हृतः क्षितिभृतां गोष्ठीषु तिष्ठन् क्षणम् ।

सद्यो विस्मृतसिंहलेन्द्रविभवः कक्षाप्रदेशेऽप्यहो

हास्येनैव कुतूहलेन महता ग्राम्यो यथाहं कृतः ॥ (क)

बाह्म । वसुभूते ! अद्य खलु चिरात् स्वामिनं द्रक्ष्यामीति,

यत्सत्यमानन्दातिशयेन किमप्यवस्थान्तरमनुभवामि । कुतः

विद्वद्भिः कम्पस्य प्रथयतितरां साध्वसवशात्

अविस्पष्टां दृष्टिं तिरयति पुनर्व्याप्तसलिलैः ।

स्खलद्वर्णां वाणीं जडयतितरां गद्गदतया

जरायाः साहाय्यं मम हि परितोषोऽप्य कुरुते ॥ (ख)

(क) आच्छिन्न इति । वत्सान् अश्वान् तुरगान् निर्वर्णयन् पश्यन् अहं जयकुञ्जरेणाच्छिन्नः क्षितिभृतां राज्ञां गोष्ठीषु सभां तिष्ठन् क्षणं सङ्गीतध्वनिना वाद्यस्वरेणाहृतः, सद्यो विस्मृतः सिंहलेन्द्रस्य विभव ऐश्वर्यं येन स कक्षाप्रदेशे हास्येनैव महता करिणा कुतूहलेन कौतुकेन अहं ग्राम्य अवन्तिराजविभवो यथा सदृश कृतः ।

(ख) विद्वद्भिरिति । साध्वसवशात् भयवशात् कम्पस्य विद्वद्भिः प्रथयतितरामतिशयेन प्रथयति, अविस्पष्टां जरया मलिनीभूतां दृष्टिं

विदू। अये भूत्वा। एदु एदु अमच्चो।

वत्स। विदूषकस्य कण्ठे रत्नमालां दृष्ट्वा, अपवार्य। बाभ्रव्य! जानेसैवेयं रत्नमाला या दैवेन राजपुत्र्यै प्रस्थानसमये दत्तेति।

बाभ्र। अमात्य! अस्ति सादृश्यम् तत् किं वसन्तकादवगच्छामि प्रभवमस्याः?

वत्स। बाभ्रव्य! मा मैवम् महति राजकुले रत्नबाहुल्यान्न दुर्लभो भूषणानां सम्वादः। इति परिक्रामति।

विदू। राजानस्सहिय्य। एसो वच्छाहिवो, ता उपसप्पदु अमच्चो (१)।

वत्स। उपसृत्य। जयति जयति देवः।

राजा। उत्थाय। अभिवादये।

वत्स। श्रेयान् भूयाः।

राजा। आसनमासनमार्याय।

विदू। भो! एदमासणं उवविसदु अमच्चो (२)। इत्युत्तरीयं प्रयच्छति।

---

(१) एष वत्साधिपस्तदुपसर्पत्वमात्यः।

(२) भो! इदमासनमलोपविशत्वार्यः।

नवांशुसलिलैर्नयनास्रुभिस्तिरयति आच्छादयति। तथा गद्गद तया स्खलदर्थां अविस्पष्टां वाणीं जड़यतितरां जड़ातिशयेन करोति, हि यतोऽद्य मम परितोषो राजदर्शनजनित आनन्दः जरया वार्द्धक्यस्य साहाय्यं कुरुते, पूर्वोक्तकारणत्रयजैरा दर्शिता तादृश पदार्थगतहेतुत्वेन वाच्यलिङ्गमलङ्कारः यदुक्तं दर्पणकृता हेतोर्वाक्य पदार्थत्वे वाच्यलिङ्गमलङ्कृतिरिति लक्षणात्।

Digitized by Google

वसु उपविशति।

कञ्चु। देव! बाभ्रव्यः प्रणमति।

राजा। भद्रे कृष्णे दत्ता। बाभ्रव्य! इत आस्यताम्।

कञ्चु। उपविशति।

विदू। अमच्च एसा देवी वासवदत्ता पणमदि (१)।

बाभ्र। अज्ज पणमामि (२)

वसु। आयुष्मति! वत्सराजसदृशपुत्रमाप्नुहि।

कञ्चु। देवि! बाभ्रव्यः प्रणमति।

सर्वे। उपविशन्ति।

राजा। आर्य्य वसुभूते! अपि कुशलं तत्रभवतः सिंहलेश्वरस्य?

वसु। अज्ज मवलोक्य निश्चेष्ट च। देव! न जाने, किं विज्ञापयामि मन्दभाग्यः। अधोमुखस्तिष्ठति।

बाभ्र। धिगिमादृशमजसम्। हद्धी हद्धी, किं दाणिं वसुभूदी कधइस्सदि (३)।

राजा। वसुभूते! कथं पर्य्याकुलेवासि (४)

बाभ्र। अयवार्य! चिरमपि स्थित्वा यत् कथनीयं तदिदानीमेव कथ्यताम्।

वसु। बाढम्। देव! न शक्यं निवेदयितुं तथाप्येष कथयामि मन्दभाग्यः, यासौ तत्रभवतः सिंहलेश्वरस्य दुहिता रत्नावली

---

(१) अमात्य! एषा देवी वासवदत्ता प्रणमति।

(२) आर्य्ये! प्रणमामि।

(३) हाधिक् हाधिक्, किमिदानीं वसुभूतिः कथयिष्यति?

Digitized by Google

नामायुष्मती सिद्धादेशेनादिष्टा, योऽस्याः पाणिग्रहणं करिष्यति, स सार्वभौमो राजा भविष्यति, तत्प्रत्ययार्थेगन्धराधिपेन बहुशः प्रार्थ्यमाना, सिंहलेश्वरेण वासवदत्तायाश्चित्तखेदं परिहरता, न दत्ता।

राजा। अपवार्य। देवि! किमिदमिदानीमलीकं त्वदीयमातुलामात्यः कथयति?

वास। विहस्य। अज्जउत्त! अहंपि ण आणामि, को एस अलिअं मन्तेदि? (१)।

विदू। ताए किं संवुत्तं (२)।

वस। ततो लावणकेन वह्निना देवी दग्धेति वार्तामुत्थाप्य, देवेन तदन्तिकं वास्तव्यः प्रहितः, पुनरपि सा प्रार्थिता च, ततस्तत्रभवता सिंहलेश्वरेण चिन्तितं देवेन सहास्माकं सम्बन्धलोपो मा भूदिति दत्ता सा रत्नावली देवाय प्रतिपादयितुमानीयमाना, समुद्रे यानभङ्गान्निमग्नेति। तदवधीङ्खलितेति।

वास। साधम्। हा हदास्मि मन्दभाइणी, हा बहिणि रअणावलि! कहिं दाणिं सि देहि मे पडिवअणं (३)।

राजा। समाश्वसिहि समाश्वसिहि, दुरवगाहा गतिर्दैवस्य,

---

(१) आर्यपुत्र! अहमपि न जानामि, कोऽलीकं मन्त्रयति?

(२) तस्याः किं संवृत्तम्।

(३) हा हताऽस्मि, मन्दभागिनी, हा भगिनि रत्नावलि! क्वेदानीमसि, देहि मे प्रतिवचनम्।

Digitized by Google

वाहनभङ्गपतितोत्थितौ नन्वेतावेव ते निर्दर्शनम्। इति कञ्चुकिनावलोक्य दर्शयति।

वास। अज्जउत्त! जुज्जदि एवं, परं कुतो मम एत्तिअं भाग्गधेअं? (१)।

राजा। अपसार्य। भाभव्य! किमेवमिति सर्वथा नार्हं गच्छामि।

भाभ्र। देव! श्रूयताम्। नेपथ्ये कलकलः।

हर्म्याणां हेमशृङ्खस्त्रियमिव निचयैर्विस्फुलिङ्गानुषाणां
सान्द्रोद्यानद्रुषण्डज्वलनपिशुनितात्यन्ततीव्रप्रतापः।
कुर्वन् क्रीडामहीध्रं सजलजलधरश्यामलं धूमपातैः
एष श्लोषार्त्तयोधिज्जन इह सहसैवोत्थितोऽन्तःपुरेऽग्निः॥ (क)

अपिच। देवीदाहप्रवादोऽयं योऽभूद्वासवदत्तके पुरा।
करिष्यन्निव तं सत्यमयमग्निः समुत्थितः॥ (ख)

---

(१) आर्यपुत्र! युज्यते एवं, परं कुतो मे एतावत् भाग्यधेयम्।

(क) हर्म्याणामिति। अर्चिषां स्फुलिङ्गानां निचयैः समूहैः हर्म्याणां प्रासादानां हेमशृङ्खस्त्रियं सुवर्णशृङ्खलशोभामिवादधानः विरचयन् सान्द्रा निबिडसंस्थिता ये उद्यानद्रुषण्डास्तेषां ज्वलनेन शोषणेन पिशुनितः पिशुनीकृतः अत्यन्त तीव्रः प्रतापः उष्णप्रखरता येन सः, तथा धूमपातैः कृष्णीत्य धूमराशिभिः सजलजलधरश्यामलं नवीननीरदमेचकं क्रीडा महीध्रं क्रीडाचलं कुर्वन्निव, तथा श्लोषेण दाहेनार्त्तो योधिज्जनो येन स एष परिलक्ष्यमाणोऽग्निः सहसा अकस्मादेव, अन्तःपुरे उत्थितः, अग्निः प्रज्वलित इत्यर्थः।

(ख) देवीति। वासवदत्तके पुरा आदौ यो देवीदाहप्रवादो वासवदत्ता-

Digitized by Google

सर्व्वे । सवसम्भ्रमं पश्यन्ति ।

राजा । कथं देवीवासवदत्ता दग्धा । हा प्रिये वासवदत्ते !

वास । अज्जउत्त ! परित्ताहि परित्ताहि ।

राजा । अये ! कथमतिसम्भ्रमात् पार्श्वस्थापि देवी नोपलक्षिता देव्याः ! पाणिं गृहीत्वा आलिक्ष । देवि ! समाश्वसिहि समाश्वसिहि ।

वास । अज्जउत्त ! मए अत्तणो किदे ण भणिदं । किं उण एसा क्खु मए णिग्घिणाए दूध निग्गडे संजमिदा सागरिआ विवज्जेदि ! ता परित्ताअदु अज्जउत्तो (१) ।

राजा । कथं देवि ! सागरिका विपद्यते ? एष गच्छामि ।

वसु । देव ! किमिदमकारणमेव मतकृतिः क्रियते ?

वास । देव वुत्तमाह वसुभूतिः ।

विदू । राजानमुत्तरीये गृहीत्वा । भो ! मा खलु साहसं करेहि(२)

राजा । उत्तरीयमाकर्षन् । अरे धिङ्मूर्ख ! सागरिका विपद्यते, किमद्यापि प्राणाः परिरक्ष्यन्ते ?

---

(१) आर्यपुत्र ! मयात्मनः कृते न भणितम्, किं पुनरेषा खलु मया निर्घृणया दूरं निगडे संयमिता सागरिका विपद्यते, मत् परित्रायतामार्यपुत्रः ।

(२) भो ! मा खलु साहसं कुरु ।

दाहवार्त्ताभूत् वासवदत्ता दग्धा जाता इति जनरव आसीत् तं प्रवादं सत्यं करिष्यन्निव इति हेतोरयमग्निः वस्तुस्थितः । अत्रोत्प्रेक्षालङ्कारः ।

Digitized by Google

वाच्य। किमिदमवस्तुनि भरतकुलं संशयतुलायामारोप्यते। अथवा किं प्रलापैर्भक्तिसदृशं करोमि।

राजा। धूमाभिधं नाटयति।

विरम विरम वह्ने! मुञ्च धूमानुबन्धम्।
प्रकटयसि किमुच्चैरर्चिषां चक्रवालम्।
विरहहुतभुजाहं यो न दग्धः प्रियायाः
प्रलयदहनभासा तस्य किं त्वं करोषि॥ (क)

क्षयमासन्नहुतवहा वर्त्तते सागरिका, तत् त्वरितमेनां सम्भावयामि।

वाच। कथं मम दुक्खभाइणीए वअणादो एवं ववसिदं अज्जउत्तेण, ता अहंपि अज्जउत्तं चेव अणुगमिस्सं (१)।

विदू। परिक्रामन् अग्रतो भूत्वा। भोदि! अहंवि पधोवदेसको होमि (२)।

---

(१) कथं मम दुःखभागिन्या वचनेन एवमध्यवसितं आर्यपुत्रेण, तदहमपि आर्यपुत्रमनुगमिष्यामि।

(२) भवति! अहं हि पथोपदेशको भवामि।

(क) विरमेति। हे वह्ने! अनल! विरम विरम निवृत्तो भव विरमेत्यत्र सम्भ्रमे द्विर्भावः धूमानुबन्धं धूमोद्गमं मुञ्च, किं किमर्थं अर्चिषां शिखानां चक्रवालं समूहं उच्चैः प्रकटयसि, अनेन विधिना न मम कांचिदपि हानिर्भविष्यतीत्यर्थः। प्रियाया विरहहुतभुजा वियोगानलेन योऽहं न दग्धः तेनैव दाह उचित इत्यर्थः। तस्य अदग्धस्य मम प्रलयदहनभासा प्रलयवह्निस्फुरणेन त्वं किं करिष्यसि न किञ्चिदपि कर्तुं शक्नोषीत्यर्थः।

Digitized by Google

कञ्चु। कथं प्रविष्ट एव ज्वलनं वत्सराजः तन्ममापि दृष्टरा-जपुत्रीविपत्तेर्युक्तमिहैवात्मानमाहुतीकर्त्तुम्।

कञ्चु। सत्यम्। हा महाराज! हा महाराज! किमिद-मकारणमेव भरतकुलं संशयतुलामारोपितं, अथवा किं प्रलापेनाहमप्यि भक्तिसदृशमाचरामि। इति सर्वे अग्निप्रवेशं नाटयन्ति।

ततः प्रविशति निगडसंयता सागरिका।

सागः। हद्धी हद्धी, आः समन्तदो पज्जलिदो हुदवहो। अज्ज हुदवहो दिट्ठिआ करिस्सदि मे दुक्खावसाणं (१)

राजा। अये! दूयमासन्नहुतवहा सागरिका वर्त्तते। तत् त्वरितमेनां सम्भावयामि। त्वरितमुपसृत्य। अयि प्रिये! किम-द्यापि मध्यस्थतया वर्त्तसे।

सागः। राजानं दृष्ट्वा आत्मगतम्। कधं अज्जउत्तो, ता एदं पेक्खिअ पुणोवि मे जीविदासा संवुत्ता। प्रकाशम्। भट्टा! परित्तायह परित्तायह (२)।

राजा। भीरु! अलं भयेन।

मुहूर्त्तमपि सह्यतां, बहुल एष धूमोद्गमः—(क)

---

(१) हा धिक् हा धिक्, आः समन्तात् प्रज्वलितो हुतवहः। अद्य हुतवहो दिष्ट्या करिष्यति मे दुःखावसानम्।

(२) कथमार्य्यपुत्रः, तस्मादेनं प्रेक्ष्य पुनरपि मे जीविताशा संवृत्ता। भर्त्तः! परित्रायस्व परित्रायस्व।

(क) मुहूर्त्तमिति। बहुलः महान् एष धूमोद्गमः मुहूर्त्तं

Digitized by Google

सप्रतोऽवलोक्य।

हहा धिगिदमंशुकं ज्वलति ते स्तनात् प्रच्युतम्।

विलोक्य।

मुहुः स्खलसि किम्—

निपुणमवलोक्य।

—कथं निगडसंयतासि, द्रुतम्

नयामि भवतीमितः प्रियतमे! अवलम्बस्व माम्॥

कण्ठे गृहीत्वा निमीलिताक्षः सूर्यस्वप्नं नाटयन्। अहो! चक्षु-
रपगतोऽयं मे सन्तापः। प्रिये! समाश्वसिहि समाश्वसिहि।

व्यक्तं लग्नोऽपि भवतीं न धक्ष्यति हुताशनः।
यतः सन्तापमेवायं सूर्यस्ते हरति प्रिये!॥(क)

अक्षिणी सहसोन्मील्य निरीक्ष्य च। अहो महदाश्चर्यम्।

क्वासौ गतो हुतवहस्तदवस्थमेतत् (ख)

क्षणकालमपि सह्यतां हहा खेदे, धिक् वह्निमित्यर्थात् ते तव स्तनात् प्रच्युतं स्खलितं इदंशुकं ज्वलति, किं कथं मुहुः स्खलसि, कथं निगडेन बन्धनस्तम्भेन संयता बद्धासि द्रुतं शीघ्रमितः प्रदेशात् भवतीं नयामि, हे प्रियतमे! मामवलम्बस्व अन्यथा स्थानान्तरं नयनं दुर्घटमेवेत्यर्थः।

(क) व्यक्तमिति। व्यक्तं स्फुटं यथा भवति यथा लग्नोऽपि त्वामाश्रितोऽपि हुताशनो दहनः भवतीं न धक्ष्यति न दग्धां करिष्यति, यतः हे प्रिये! ते तवायं सूर्यः सन्तापं हरति अत्र वह्निसृष्टावास्तव सूर्यस्यापि उष्णत्वसम्भावनया तादृशकथनात् अतिशयोक्तिरलङ्कारः।

(ख) क्वेति असौ हुतवहोऽनलः एतदन्तःपुरं तदवस्थं प्रलया-वस्थमिव भासत इत्यर्थः। कथं इयं अवन्तिसुतात्मजा वासवदत्ता एष बाभ्रव्य अयं वसुभूतिः हे वयस्य! स्वप्ने मम मति भ्रमति किं? विपर्यस्ता किम्? नु भो! इदमिन्द्रजालं द्वयोरन्यतरमेवेत्यर्थः।

Digitized by Google

अन्तःपुरं——

वासवदत्तां दृष्ट्वा।

——कथमवन्तिनृपात्मजेयम्।

वास। राज्ञः शरीरं परामृशन्ती सहर्षम्। दिट्ठिआ अक्खद-सरीरो अज्जउत्तो (२)।

राजा। बाभ्रव्य एषः—

बभ्रु। विजयतां महाराजः। देव! दिट्ठ्या वर्द्धसे, पुनरुच्छ्वसिताः स्मः।

राजा।

—वसुभूतिरयम्—

वसु। देव दिट्ठ्या वर्द्धसे।

राजा।

—वयस्य!

विदू। जेदु जेदु भवं।

राजा। विचिन्त्य सवितर्कम्।

स्वप्ने मतिर्भ्रमति किं न्विदमिन्द्रजालम्॥

विदू। भो मा सन्देहं करेहि, इन्दजालं खु एदं। भणिदं तेण दासीए पुत्तेण ऐन्दजालिएण, जह अवस्सं एव्व देवेण एक्को मे खेड्डणओ दट्ठव्वोत्ति, ता तं जेव्व एदं (१)।

---

(२) दिष्ट्या अक्षतशरीर आर्यपुत्रः।

(१) भो! मा सन्देहं कुरु, इन्द्रजालं खल्विदम्। भणितं तेन दास्याः

Digitized by Google

राजा । देवि ! इयमस्माभिरिहानीता त्वद्वचनात् सागरिका

वास । विइस्स । अज्जउत्त ! जाणिदं दे सव्वं (१) ।

वसु । सागरिकां दृष्ट्वा अपवार्य । बाभ्रव्य ! सदृशीयं राजपुत्र्याः

बाभ्र । अमात्य ! ममाप्येतदेव मनसि वर्त्तते ।

वसु । प्रकाशं राजानमुद्दिश्य । देवः ! कुत इयं कन्यका ?

राजा । देवी जानाति ।

वसु । देवि ! कुतः पुनरियं कन्यका ?

वास । अमच्च ! एसा क्खु सागरदो पाविदेत्ति भणिअ, अमच्चजोअन्धरायणेण मम हत्थे णिक्खित्ता अदो एव्व सागरिअत्ति सद्दावीअदि (२) ।

राजा । स्वगतम् । कथं यौगन्धरायणेन न्यस्ता ? कथमसौ ममानिवेद्य किञ्चित् करिष्यति ।

वसु । अपवार्य । बाभ्रव्य ! यथा सुसदृशी वसन्तकस्य कण्ठे रत्नमाला, अस्या अपि सागरात् प्राप्तिः तथा व्यक्तं सिंहलेश्वरस्य दुहिता रत्नावलीयम् । उपसृत्य प्रकाशम् । आयुष्मति रत्नावलि ! त्वमीदृशीमवस्थां गतासि ।

वास । दिट्ठा सागरम् । कधमसो वसुभूदी ? (३) ।

इत्येव ऐन्द्रजालिकेन, यथा अवश्यमेव देवेन एकं मे कौतुकं द्रष्टव्यमिति, तत्सात्तदेवेदम् ।

(१) आर्यपुत्र ! ज्ञातं ते सर्वम् ।

(२) अमात्य ! एषा खलु सागरतः प्राप्ता, इति भणित्वा, अमात्ययौगन्धरायणेन मम हस्ते निक्षिप्ता, अतएव सागरिकेति शब्द्यते ।

(३) कथमसावार्यो वसुभूतिः ?

Digitized by Google

वस। हा हतोऽस्मि मन्दभाग्यः। इति भूमौ पतति।

सार। हा हदह्मि मन्दभाइणी! हा ताद! हा अम्ब! कहिं सि देहि मे पडिवअणं(१) इत्यात्मानं पातयन्ती जोरुहमुपगता

वास। सवम्भ्रमम्। कञ्चुइ! इयं सा मम बहिणिआ रत्नावली (२)।

कञ्चु। देवि! इयमेव सा।

वास। रत्नावलीमालिङ्ग्य। बहिणि! समस्सस समस्सस (३)।

राजा। कथमुद्दात्तवंशप्रभवस्य सिंहलेश्वरस्य विक्रमबाहोरात्मजेयम्।

विदू। स्वगतं रत्नमालां दृष्ट्वा। पढमं एव्व जाणिदं मए, जहु सामञ्ञजणस्स इदिसो परिच्छदो होदित्ति (४)।

वस। उत्थाय। राजपुत्रि! समाश्वसिहि, समाश्वसिहि। नन्विदं ज्यायसी ते भगिनी दुःखमास्ते, तत् परिष्वजस्वैनाम्

रत्नावली। समाश्वस्य, राजानं तिर्यगवलोक्य, स्वगतम्। किदापराधा खु अहं देवीए ण सक्कोमि मुहं दंसिदुं (५)। इत्यधोमुखी तिष्ठति।

वास। सास्रं बाहुं प्रसार्य। एहि अदिनिट्ठुरे! दाणिं पिअ-

---

(१) हा हतास्मि मन्दभागिनी, हा तात! हा अम्ब! कुत्रासि, देहि मे प्रतिवचनम्।

(२) कञ्चुकिन्! इयं सा मम भगिनी रत्नावली?

(३) भगिनि! समाश्वसिहि समाश्वसिहि।

(४) प्रथममेव ज्ञातं मया, नहि सामान्यजनस्येदृशः परिच्छदो भवतीति।

(५) कृतापराधा खल्वहं देव्या न शक्नोमि मुखं दर्शयितुम्।

Digitized by Google

अहिणवी एहि, सिणेहं देहेहि (१)। इति कण्ठे लगति।

रत्नावली। खलिव नाटयति।

वास। अपवार्य। अज्जउत्त! लज्जेमि अहं दूमिआ अत्तणो विसंसत्तणेण, ता लहुं अवणेहि से एदं वत्तवं (२)।

राजा। सपरितोषम्। यद्याह देवी। सागरिकाया वस्त्रनयनमभिनयति।

वास। अज्जउत्त! अमच्चजोगन्धरायणेण एत्तिअं कालं दुज्जणीकिदाम्हि, जेण जाणन्तेवि ण मे णिवेदिदं (३)।

सत्रः प्रविशति यौगन्धरायणः।

यौगन्धरायणः।

देव्या महत्त्वनात् तथाभ्युपगतः पत्युर्वियोगो महान्
सा देव्यन्यकलत्रसंघटनया दुःखं परं प्रापिता।
तस्याः प्रीतिमियं करिष्यति जगत्स्वामित्वलाभः प्रभोः
सत्यं दर्शयितुं तथापि वदनं शक्नोमि नो लज्जया॥ (क)

(१) एहि अतिनिष्ठुरे! इदानीमसि प्रियभगिनी! एहि, त्वे हं दर्शय।

(२) आर्यपुत्र! लज्जे अहमस्मना आत्मनो दुःसंसर्गत्वेन, तस्मात् लघु अपनयास्मात् वस्त्रम्।

(३) अमात्ययौगन्धरायणेनैतावन्तं कालं दुर्जनीकृताऽस्मि, येन जानतापि न मे निवेदितम्।

(क) देव्येति। देव्या वासवदत्तया महत्त्वनात् पत्युः स्वामिनो महान् वियोगो विरहस्तथा तेन प्रकारेणाभ्युपगतः सोढः, सा इयं देवी अन्यकलत्र संघटनया सपत्नीघटनया परं दुःखं प्रापिता, प्रभोः जगत्स्वामित्वलाभो जगदेकाधिपत्य प्राप्तिस्तस्या देव्याः प्रीतिं करिष्यति, सत्यं तथापि अहं लज्जया वदनं दर्शयितुं नो शक्नोमि अपकारकत्वादिति भावः।

अथवा, किं क्रियते दैवमत्यन्तमाननीयेऽपि निरनुरोधवृत्ति स्वामिभक्तिव्रतम् । निष्क्र्य । अयं देवो महाराजः, यावदुपसर्पामि । उपसृत्य । जयतु जयतु देवः, देव ! क्षम्यतां यन्मया अनिवेद्य कृतम् ।

राजा । कथय किमनिवेद्य कृतम् ।

यौग । करोत्वासनपरिग्रहं देवः, सर्वं विज्ञापयामि ।

सर्वे । उपविशन्ति ।

यौग । देव ! श्रूयतां, येयं सिंहलेश्वरस्य दुहिता सा सिद्धेनादिष्टा, यथा योऽस्याः पाणिग्रहणं करिष्यति, स सार्वभौमो राजा भविष्यति, ततस्तत्प्रत्याहृताभिः स्वामिनोऽर्थे बहुशः प्रार्थ्यमानेनापि सिंहलेश्वरेण देव्या वासवदत्तायाश्चित्तखेदं परिहरता यदा न दत्ता ।

राजा । तदा किम् ।

यौग । तदा क्षोभितेन वह्निना देवी दग्धेति प्रसिद्धिमुत्पाद्य, तदन्तिकं बाभ्रव्योऽपि प्रहितः ।

राजा । यौगन्धरायण ! अतःपरं श्रुतं मया, अर्पेयं देवीहस्ते किमप्यनुचिन्त्य स्थापिता ।

विदू । भो ! एदस्स अभिप्पओ मए णादो, अणाचक्खिदं एदं जाणीअदि एव्व, जह अन्तेउरगदं एदं जाव अन्तेउरगदो देवो सुहेण दंसइस्सदित्ति (१) ।

---

(१) भो ! एतस्याभिप्रायो मया ज्ञातः ! अनाख्यातमपि इदं ज्ञायते एव, यदन्तः पुरगतामेतामन्तः पुरगतो देवः सुखेन द्रक्ष्यतीति ।

Digitized by Google

राजा। यौगन्धरायण! गृहीतस्तेऽभिप्रायो वसन्तकेन।

यौगं। यदाज्ञापयति देवः।

राजा। ऐन्द्रजालिकवृत्तान्तोऽपि मन्ये त्वत्प्रयोग एव।

यौगं। अन्यथा अन्तःपुरे बद्धाया अस्याः कुतो देवेन दर्शनम्? अदृष्टायाश्च वसुभूतिना कुतः परिज्ञानम्।

राजा। विहस्य। परिज्ञातायाश्च भगिन्याः सम्प्रति यथा करणीयं, तथा देवो प्रमाणम्।

वास। अज्जउत्त! फुडं एव्व किं न भणासि, जह पडिवादेहि मए रअणावलिंत्ति (१)।

विदू। भोदि, सुट्ठु तुए जाणिदो अमच्चस्स अभिप्पाओ (२)

वास। हत्थो प्रसार्य। एहि रअणावलि! एहि, दाणिं किम्पि दे मे बहिणिआअणुरूवं होदु (३)। इति रत्नावलीं स्वकीयैराभरणैरलंकृत्य, हस्ते गृहीत्वा, राजानमुपसृत्य। अज्जउत्त! एदं रअणावलिं पडिच्छ (४)।

राजा। सहर्षं हस्तौ प्रसार्य। को देव्याः प्रसादो न बहु मन्यते। इति सागरिकां गृह्णाति।

वास। अज्जउत्त! दूरे क्खु एसाए णादिउलं, ता तह

---

(१) आर्यपुत्र! स्फुटमेव किं न भणसि, यथा प्रतिपादय मह्यं रत्नावलीमिति।

(२) भवति! सुष्ठु त्वया ज्ञातोऽमात्यस्याभिप्रायः।

(३) एहि रत्नावलि! एहि, किमपि ते मे भगिन्या अनुरूपं भवतु।

(४) आर्यपुत्र! इमां रत्नावलीं प्रतीच्छ।

Digitized by Google

करेदु, जह बन्धुजणं ण सुमरेदि (१)। इति समर्पयति।

राजा। यथाज्ञापयति देवी।

विदू। सहर्षं नृत्यति। हो हो भो! जअदु जअदु भवं, पुहवी क्खु दाणिं हत्थगदा पिअवअस्सस्स (२)।

वसु। राजपुत्रि! वासवदत्तां प्रणामेनार्चय।

रत्नावली। तथा करोति।

बाभ्र। देवि! स्थाने देवीशब्दमुद्वहसि।

वास। रत्नावलीमालिङ्ग्य। देवीशब्देन प्रसादं करोति।

बाभ्र। इदानीं सफलपरिश्रमोऽस्मि संवृत्तः।

यौग। देव! किं ते भूयः प्रियमुपकरोमि।

राजा। किमतःपरमपि प्रियमस्ति। यतः

नीतो विक्रमबाहुरात्मसमतां प्राप्तेयमुर्वीतले
सारं सागरिका ससागरमहीप्राप्तैकहेतुः प्रिया।
देवी प्रीतिमुपगता च भगिनीलाभात् जिताः कोशलाः

---

(१) आर्यपुत्र! दूरे खलु एतस्या ज्ञातिकुलं, तस्मात् तथा कुरु यथा बन्धुजनमेषा न स्मरति।

(२) जयतु जयतु भवान्, पृथिवी खल्विदानीं हस्तगता प्रियवयस्यस्य।

(क) नीत इति। विक्रमबाहुः सिंहलेश्वरः आत्मसमतां नीतः प्रापितः इमीतले धरातले सारं सारभूता ससागरायाः महाः धरायाः प्राप्तेलाभस्य एकहेतुरियं प्रिया सागरिका प्राप्ता, भगिनीलाभात् रत्नावलीलाभात् देवी वासवदत्ता प्रीतिमुपागता च, कोशलाः कोशलदेश-

Digitized by Google

किं नामास्ति विधेयमत्र भुवने यस्मिन् करोमि स्पृहाम्(क) तथापीदमस्तु ।

वासिनः लक्षणया तद्देशवासिजनो लक्ष्यत इति तात्पर्य्यम् । जिता वशीकृताः एतेन स्वाभीष्टसिद्धिः सूचिता, अत्र भुवने किं नाम वस्तु विधेयं कर्त्तव्यं अस्ति यस्मिन् विषये अहं स्पृहां करोमि, तादृशं वस्तु नास्त्य वशिष्टमित्यर्थः ।

—००—

Digitized by Google

भरतवाक्यम्।

उर्वीमुद्दामशस्यां जनयतु विसृजन् वासवो वृष्टिमिष्टाम्
इष्टैस्तैर्विष्टपानां विदधतु विधिवत् प्रीणनं विप्रमुख्याः।
आकल्पान्तञ्च भूयात् समुपचितसुखः सङ्गमः सज्जनानाम्
निःशेषं यान्तु शान्तिं पिशुनजननिरो दुर्जया वज्रलेपाः।(क)

इति निष्क्रान्ता सर्वे।

इति इन्द्रजालिको नाम
चतुर्थोऽङ्कः।

इति श्रीहर्षदेवस्य कृतिरियं रत्नावली समाप्ता।

(क) उर्वीमिति। वासव इन्द्रः इष्टां अभीष्टां वृष्टिं विसृजन् कुर्वन् उर्वीं पृथ्वीं उद्दामानि अधिकानि शस्यानि यस्यां तां अपरिमितफलशालिनीं जनयतु विदधातु, विप्रमुख्या ब्राह्मणश्रेष्ठा स्तैरिष्टैर्यज्ञैर्विधिवत् विष्टपानां देवलोकानां प्रीणनं तृप्तिं विदधतु कुर्वन्तु, आकल्पान्तञ्च कल्पपर्यन्तमित्यर्थः समुपचितसुखः प्रवर्द्धमानसुखः सज्जनानां सङ्गमो भूयात् भवतु, दुर्जया जेतुमशक्या अतएव वज्रस्य लेपादव तद्वदतिकठिनाः पिशुनजनानां दुर्जनानां गिरो वाक्यानि निःशेषं शान्तिं यान्तु प्राप्नुवन्तु।

Digitized by Google

४७ काव्यसंग्रह (सम्पूर्ण) ५
४८ शिक्षानुशासन सटीक ।०
४९ ऋतुसंहार सटीक ।=
५० विक्रमोर्वशी सटीक १॥०
५१ वसन्ततिलकभाष ।=
५२ गायत्री व्याख्या ॥०
५३ सांख्यदर्शन (भाष्य सहित)
सांख्य प्रवचन भाष्य २
५४ भोज प्रबन्ध ।।।०
५५ नलोदय सटीक ॥=
५६ वैद्यकेन कृत प्रथ खण्ड
माण्डूक्य (सटीक सभाष्य) ५
५७ छान्दोग्य (उपनिषद्)
सभाष्य सटीक ५
५८ तैत्तिरीय ऐतरेय श्वेताश्वतर
(उपनिषद्) सभाष्य सटीक २
५९ बृहदारण्यक (उपनिषद्)
सटीकसभाष्य १०
६० सुश्रुत वैद्यक ४
६१ शार्ङ्गधर (वैद्यक) १
६२ वेतालपञ्चविंशति ।।।०
६३ प्रातञ्जल दर्शन (सभाष्य-सटीक) ४
६४ आत्मतत्त्वविवेक (बौद्धाधिकार) २
६५ शुक्तिकोपनिषत् =
६६ उपमान चिन्तामणि ।०
६७ नागानन्द नाटक १
६८ पूर्णप्रज्ञ दर्शनम् (सभाष्यसि
क्षत भाष्य सहितम्) ४
६९ चन्द्रशेखरचम्पू काव्यम्
सम्पूर्ण २
७० सामवेदस्य मन्त्र ब्राह्मणम्
भाष्य सहितम् २
७१ आरण्य संहिता भाष्य सहित १
७२ विद्धशाल भञ्जिका नाटिका सटीक १
७३ कारण्डव्यूह (बौद्धशास्त्रम्) २
७४ कुवलयानन्द सटीक अलङ्कार २
७५ प्रियदर्शिका नाटिका सटीक
(श्रीहर्ष विरचित) ॥०
७६ सारस्वत व्याकरण सटीक पूर्वार्द्ध १।२
७७ वासवदत्ता सटीक २
७८ (कालिदास कृत)
पुष्पबाण विलास काव्य सटीक ॥०
७९ सचित्र शतकम्, पदारविन्द
शतकम्, स्तुति शतकम् मन्दस्मित-
शतकम् कटाक्षशतकम् ४
८० मनुसंहिता कुल्लूकभट्ट कृत
टीका सहित ५
८१ नैषध चरितम् मल्लिनाथ कृत
टीका सहित) १०
८२ चन्द्रालोक प्राचीन अलङ्कार ॥०
८३ वीरमित्रोदय स्मृति शास्त्र १०
८४ भावप्रकाश (वैद्यक) १०
८५ प्रबोधचन्द्रोदय
नाटक सटीक ५

Digitized by Google

८६ अनर्घराघव नाटक (मुरारि कृत) २
८७ दैवतब्राह्मण सभाष्य १
८८ षड्विंश ब्राह्मण १
८९ मीमांसा परिभाषा ॥०
९० अर्थ संग्रह (लौगाक्षी कृत) मीमांसा ॥०
९१ रघुवंश सटीक १॥०
९२ मेघदूत सटीक ॥।०
९३ ईश्वरनिरूपणम् (तर्कवाचस्पति कृतम्) १
९४ ईश्वरानुमानचिन्तामणि (गङ्गेशोपाध्याय कृत) १
९५ न्यायदर्शन सभाष्य सवृत्ति २॥०
९६ सटीकवाल्मीकिरामायण (बालकाण्डस्य प्रथमावधि त्रयोदश सर्गपर्य्यन्तम्) १॥०
९७ सटीक वाल्मीकि रामायण बालकाण्डस्य चतुर्दश सर्गावधि पञ्चविंशति सर्गपर्य्यन्तम् १॥०
९८ मदन पाल निघण्टु (वैद्यक) १
९९ संस्कृतशिक्षामञ्जरी प्रथमभाग-
१०० संस्कृतशिक्षामञ्जरी द्वितीय भागः १०
१०१ साहित्यदर्पण १॥०
१०२ श्रीहर्षचरित बाणभट्टकृत २
१०३ अमर कोष ॥०
१०४ वेदान्तसूत्र शङ्कराचार्य्य कृत शारीरकभाष्य तथा गोविन्दानन्द कृत टीका सहित १०
१०५ वेदान्तपरिभाषा १
१०६ वेदान्तसार सटीक १
१०७ सटीक निदान ४
१०८ कामन्दकी नीतिसार १
१०९ मल्लिकामारुत प्रकरणसटीक २
११० अत्रि विष्णु हारीत, याज्ञवल्क्य उशना अङ्गिरा यम आपस्तम्ब, संवर्त्त कात्यायन बृहस्पति पराशर व्यास शंख लिखित दक्ष गौतम शातातप वशिष्ठ प्रणीत संहिता (धर्मशास्त्र) १५
१११ मत्स्यपुराण ६
११२ चरकसंहिता (वैद्यक) सम्पूर्ण ६
रसेन्द्रचिन्तामणि (वैद्यक) ४
११४ भगवद्गीता शाङ्करभाष्य आनन्दगिरि कृत टीका तथा सुबोधिनी सहित ५
११५ शब्दशक्तिप्रकाशिका ॥०
११६ मालती माधव सटीक २॥०
११७ सटीक भट्टिकाव्य ४
११८ सटीक काव्यप्रकाश ४
११९ सटीक वाल्मीकिरामायण बालकाण्डस्य षड्विंशावधि पञ्चत्रिंशत्सर्गपर्य्यन्तम् ॥।०

कलिकाता संस्कृत विद्यामन्दिरे—वि,ए, उपाधिधारिणः
श्रीजीवानन्द विद्यासागर-भट्टाचार्य्यस्य सकाशात् लभ्यानि ॥

Digitized by Google

Digitized by Google

Digitized by Google